RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2024-26
Posting Date.: 4-5, 19-20 of Every Month

॥ ओ३म् ॥
यस्य न ज्ञायते शीलन्न
कुलन्न च संश्रयः।
न तेन सङ्गतिङ्कुर्य्या-
दित्युवाच बृहस्पतिः॥
पञ्चतन्त्रम्

सुवृत्तः शीलसम्पन्नः
प्रसन्नात्मात्मविद्बुधः।
प्राप्येह लोके सत्कारं
सुगतिं प्रतिपद्यते॥
(महाभारत - शान्तिपर्व 160/23)- मनु 12/103

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत - संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेबसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥
वदन्ति तत् तत्त्वविदः
तत्त्वं यद्ज्ञानमद्वयम्।
ब्रह्मेति परमात्मेति
भगवानिति शब्द्यते॥
(श्रीमद्भागवत महापुराण 1.2.11)

अर्थ ह्यविद्यमानेऽपि
संसृतिर्न निवर्तते।
ध्यायतो विषयानस्य
स्वप्नेऽनर्थागमो यथा॥
(श्रीमद्भागवत 11/28/13)

卐 वर्षम्-१४ 卐 अंकः-११ (३२३) नवदेहली 卐 १/२ दिसम्बरमासः २०२४तः १५ दिसम्बरमासः २०२४ पर्यन्तम् 卐 विक्रमसंवत्-२०८१ 卐 सृष्टिसंवत्-१,९६,०८,५३,१२४ 卐 पृष्ठम्-१२

## उत्तरप्रदेशस्य पर्यटनविभागपरतया महाकुम्भस्य 2025 प्रस्तावनाकार्यक्रमः भव्यतया आयोजितः

नवदेहली । अशोकाहोटल इत्यत्र आयोजिते कार्यक्रमेऽस्मिन् मुख्यातिथिः केंद्रीयपर्यटनमंत्री माननीयः गजेंद्रसिंहशेखावतः उत्तरप्रदेश-पर्यटन एवं संस्कृति-मंत्री जयवीर-सिंहश्च उपस्थितौ। अथ च



केंद्र सर्वकारस्य विभिन्न मंत्रालयाः संस्थानां प्रतिनिधयः, अनेकेषां देशानां राजदूताः, उच्चायुक्ताः उच्च-आयोगस्य अधिकारिणः प्रमुख सचिवाः, विशेष सचिवाः पर्यटन-

शेषभागः सप्तमपुटे




## स्वास्थ्यसंरक्षणस्य स्वावलम्बने पतञ्जलिविश्वविद्यालयस्य अग्रणिभूमिका - आचार्यबालकृष्णः

हरिद्वारम्। पतञ्जलिविश्वविद्यालयस्य दर्शनं संस्कृत विभागश्च इत्यनयोः संयुक्त तत्वावधाने 'स्वावलम्बन स्वास्थ्य संरक्षणमिति' विषये सप्तदिवसीयराष्ट्रियकार्यशाला आयोजनं जातम्। कार्यशालायाः उद्घाटनं कुलपति आचार्य श्री बालकृष्णः अकरोत्। मुख्य संरक्षिका प्रो. साध्वीदेवप्रिया, मुख्यातिथिः राष्ट्रीय



संस्कृत विश्वविद्यालय तिरूपतेः प्रो.नारायण पी. विशिष्टातिथिः हिन्दूमहाविद्यालय, दिल्ली इत्यस्य डॉ. अनीताराजपालः गुरूकुलकांगड़ीविश्वविद्यालयस्य डॉ बबीताशर्मा च स्व विचारान् व्यक्त्यकुर्वन् । संयोजक डॉ. गौतम आर. उक्तवान् यत् कार्यशालायामस्यां केन्द्रीयसंस्कृतविश्वविद्यालय, देवप्रयागतः २० पतंजलि विश्वविद्यालयतः ६० विद्यार्थिनः प्रतिभागं कुर्वन्ति। कार्यशालायां विद्यार्थिभ्यः स्वयं स्वस्थतया जीवितुं योगः, आयुर्वेदः, प्राकृतिक चिकित्सा एक्युप्रेशर इत्यासां तकनीकीनां प्रयोगः शिक्षितः।

कार्यशालायामस्यां प्रति-कुलपतिः प्रो. मंयकअग्रवालः, ओडीएल निदेशकः प्रो. सत्येन्द्रमित्तलः, कुलसचिवः डॉ. प्रवीणपूनिया, डॉ. मनोहरलालआर्यः, डॉ. स्वामीपरमार्थदेवः, स्वामीआर्षदेवः, प्रो. के.एन. एस. यादवः, प्रो. ए.के.सिंहः, प्रो. ओमनारायणतिवारी, डॉ. गणेशपाड्ंया, डॉ. प्रज्ञानदेवः, डॉ.सांवरसिंहः, डॉ. वैशाली, डॉ. अलका, डॉ. भागीरथी इत्येते उपस्थिताः आसन्।

## प्रो.श्रीनिवासवरखेडी 'डी.लिट्' इत्यनेन मानदोपाधिना सम्मानितः

हरिद्वारम् (अजयकुमारमिश्रा)

उत्तराखण्डसंस्कृतविश्वविद्यालय -हरिद्वारस्य ११तमे दीक्षांतसमारोहे केन्द्रीयसंस्कृतविश्वविद्याय, दिल्ली इत्यस्य कुलपतिः प्रो श्रीनिवासवरखेडी संस्कृत-विद्या, शिक्षा-व्यवस्थां शैक्षणिकदृष्ट्या संगणकीय दृष्ट्या च गुणोत्कर्षकारिणीं विनिर्मातुं डी.-लिट की मानद उपाधिना अलंकृतः। अवसरेस्मिन् उत्तराखण्डस्य



महामहिम राज्यपालः ले.ज. गुरमीतसिंहः इत्यस्य भव्य उपस्थितौ उत्तरखण्डसंस्कृतविश्वविद्यालय, हरिद्वारस्य कुलपतिः प्रो दिनेशचंद्रशास्त्री, प्रतिकुलपतिः, डा चिन्मयपंड्या, देवसंस्कृतिविश्वविद्यालय ,हरिद्वार , राममंदिर ट्रस्टकोषाध्यक्षः स्वामीगोविंदगिरि महाराजः इत्येभिः सहिताः संस्कृतशिक्षासचिवः दीपककुमार गैरोला अपि उपस्थितः।

माननीय कुलपतिः प्रो श्रीनिवासवरखेडी उपाधिना सम्मानितः सन् विश्वविद्यालयस्य छात्र-छात्राः, संकाय सदस्याः , अधिकारिणः कर्मयोगिनः इत्येभिः सहैव संस्कृत अनुरागिषु प्रसन्नता लक्षिता।।

महामहिम राज्यपालः दीक्षान्तसमारोहं प्रशंस्य संस्कृतस्य महत्त्वं प्रकाशितवान् कुलपतये च वर्धापनानि अयच्छत्। प्रो वरखेड़ी सर्वान् प्रति स्वं हार्दिकम् आभारं व्यक्तीकुर्वन्नुक्तवान् यत् संस्कृतं भारतीय भाषाणां सांस्कृतिक न्यासस्य च बौद्धिक सम्पदा यस्य समुन्नयनाय सर्वे सम्मिल्य कार्यं कुर्याम।

कुलपति प्रो दिनेश चंद्र शास्त्री प्रो वरखेडीवर्य संस्कृत भाषायां साहित्ये च निहितस्य ज्ञान विज्ञानयोः उज्जीवनकर्तृरूपं उन्नयनकर्तृरूपं च उक्तवान्।

# छात्रेषु नीरजबिष्टेन छात्रासु च निशा-मेहरा इत्यनया च विजेतृपदकं लब्धम्

(रामनगर-महाविद्यालये वार्षिक-क्रीडासमारोहः सम्पन्नः)

वृत्तहरः- डॉ. मूलचन्द्रशुक्लः

रामनगरम्। पीएनजी-राजकीय- स्नातकोत्तर-महाविद्यालये द्विदिवसाभ्यामग्रेसरन्त्याः वार्षिक-क्रीडायाः समापनं जातम्।तत्र नीरज बिष्टः छात्र चौंपियनशिप छात्रा चौम्पियनशिप निशा मेहरा इत्यनया च अर्जिता। छात्रवर्गे नीरज बिष्टः स्वर्णपदकद्वयेन रजतपदकत्रयेण च (मेडल)सर्वाधिक पदकानि अर्जितवान्। छात्रावर्गे निशा मेहरा द्वारा स्वर्णपदकत्रयं रजतपदकद्वयं च विजित्य चौम्पियनशिप लब्ध



म् ।द्वितीयदिवसे छात्रवर्गस्य १०००० परिमितं धावनप्रतियोगितायां प्रथमं स्थानं नीरज बिष्टः ,द्वितीयं स्थानं गौरवः, तृतीयं स्थानं सञ्जयः सान्त्वनापुरस्कारं च अंशुमन कोहली प्राप्तवन्तः।१५०० परिमितं धावनप्रतियोगितायां प्रथमे स्थाने गौरव नेगी,द्वितीयस्थाने नीरज बिष्टः तृतीयस्थाने च अंशुमन कोहली आसन्।१०० परिमितं धावनप्रतियोगितायां प्रथमस्थाने सावन नेगी, द्वितीयस्थाने सुमित बलोदी तृतीयस्थाने च ऋषभ कुमारः आसन् ।छात्रावर्गे १५०० परिमिते धावने प्रथमं स्थानं मीना ,द्वितीयं स्थानं बेनिका आर्या तृतीयं स्थानञ्च लक्ष्मी जोशी लब्धवत्यः। १०० परिमितं धावनस्पर्धायां प्रथमस्थाने भारती गिरी, द्वितीयस्थाने निशा मेहरा तृतीये स्थाने च बेनिका आर्या आसन।छात्रवर्गस्य ४ चतुर्गुणित ४०० रिले रेस अन्तर्सङ्काय प्रतिस्पर्धायां प्रथमे स्थाने तृतीयदलस्यस्य सुमितः,सावनः,राहुलः,अंकितश्च द्वितीयं स्थानम्,प्रथम दलस्यस्य नीरजः,गौरवः,संजयः,अंशुमनः,तृतीयं स्थानम्,चतुर्थदलस्य शैलेन्द्रः,यशदीपः,दिव्यांशुः,हिमांशुः च स्थानं लब्धवन्तः। छात्रावर्गस्य ४ चतुर्गुणित ४०० रिले रेस अन्तर्सङ्काय प्रतिस्पर्धायां प्रथमे स्थाने प्रथमदलस्य निशा,योगिता,अनामिका,भारती च आसन।द्वितीयस्थानं द्वितीयदलस्य मीना,लक्ष्मी, बेनिका, ईशा अंशुमन च प्राप्तवन्तः।तृतीयस्थाने तृतीयदलस्य सोनाली,खुशी,निशा,कल्पना च आसन।समस्तविजयीप्रतिभागिभ्यो मुख्यातिथिः प्राचार्य- प्रोफे.एम.सी.पाण्डे वर्यः विशिष्ट- अतिथिः गणेश रावत महोदयः कुलानुशासकः प्रोफे. एस. एस. मौर्य महोदयश्च प्रमाणपत्राणि पुरस्कारान् च प्रदाय पुरस्कुर्वन्ति।अस्मिन् अवसरे मुख्यातिथिः प्रोफे. एम. सी. पाण्डेवर्यः विद्यार्थिनामु त्साहवध नपूर्वकं शिक्षया सह क्रीडाप्रतियोगितास्वपि अहमहमिकया अग्रे वर्धनाय विद्यार्थिभ्यः प्रोत्साहयति। विशिष्टातिथिवर्यः विजेतृप्रतिभागिभ्यो वर्धापनानि प्रयच्छति।क्रीडा प्रभारी संयोजकश्च डॉ.योगेशचन्द्रः अतिथिभिस्सह समेषां कार्तज्ञ्यं विनिवेदयति।कार्यक्रमस्य सञ्चालनं डॉ.अलका राजौरिया डॉ. डी. एन. जोशी च संयुक्तरूपेण कृतवन्तौ।निर्णायक- मण्डले क्रीडा-शारीरिकप्रशिक्षकः अजय सिंहः, जगदीश सिंहः,विनोद कुमारः सुशील कुमारश्च आसन्। विविधस्पर्धासम्पन्नकरणाय महाविद्यालयपरिवारेण सह विशेषावदानं याः ये च दत्तवन्तः। यथा-डॉ. दीपक खाती, कुसुमगुप्ता,डॉ.विजय कुमारः, डॉ. सुरेश चन्द्रा,डॉ.मुरलीधर कापड़ी,आनन्द बल्लभ रिखाड़ी, गोविन्द मेवाड़ी,सुशील कुमारः महेन्द्र आर्यश्च इत्यादयः।

# आत्मोन्नतये संस्कृतमावश्यकम् - डॉ. रमेशकुमारझाः

(वार्ताहरो दिवाकरमणित्रिपाठी)

लखनऊ - आत्मोन्नतये संस्कृतमावश्यकम् अथ च संस्कृताध्यनेन आध्यात्मिकानुशासनम् लभ्यते तथा च समीचीनरूपेण संस्कृतभाषाज्ञानम् केवलं अस्माकं समाजाय न अपितु समस्तदेशेभ्यः परमावश्यकम् इति उपरोक्तं वक्तव्यं उत्तरप्रदेशसंस्कृतसंस्थानेन सञ्चालितायाः ऑनलाइन-प्रशिक्षण-पाठ्यक्रम- निर्माण- योजनायाः अन्तर्गतं भाषा-शिक्षण-कक्षासु समायोजिते-बौद्धिके सत्रे मुख्यवक्तृत्वेन महाभागेन रमेशकुमारझावर्येण उक्तम्। अतिथेः स्वागतं, विषयोपस्थापनं अथ च अतिथेः परिचयात्मकं वक्तव्यं प्रशिक्षणसमन्वयकेन श्रीदिव्यरंजनमहोयेन प्रस्तुतम्।

प्रशिक्षकेन श्रीजीवनप्रकाशमहोदयेन धन्यवादज्ञापनं, श्रीलल्लनबाबूमौर्यमहोदयेन कुशलतया मञ्चसञ्चालनम् , श्रीगोपालकृष्णमिश्रमहोदयेन कुशलतया तकनीकीनियन्त्रणं, श्रीसत्यब्रतशर्म्मणा मंगलाचरणं, प्रशिक्षुणा गायत्रीशाङ्खलावर्यया संस्थानगीतिका एवञ्च विशिष्टसमायोजनं श्रीदिवाकरमणित्रिपाठिना महोदयेन नीलमरानीमहोदयया शान्तिमन्त्रः च कृतः। छात्रैः अनुभवकथनं गीतगानं शान्तिमन्त्रः च कृतः।

उल्लेखनीयं यत् एतत् सत्रं भाषाविभागस्य अपर मुख्यसचिवस्य आईएएस जितेन्द्रकुमारस्य (कार्यकारी अध्यक्षस्य) प्रेरणायां, माननीयनिदेशकविनयश्रीवास्तवस्य निर्देशने, प्रशासनिकाधिकारिणः दिनेशमिश्रस्य संरक्षणे मार्गदर्शने च सम्पन्नम्। एतत् सत्रं समायोजने- प्रधानसहायकस्य भगवानसिंहचौहानस्य नाम उलेखनीयम्। यस्मिन् कार्यालयसहायकः शान्तनुमिश्रः, संयोजकः दिव्य रंजनः, राधाशर्मा, प्रशिक्षकाः एवं छात्रसहितसर्वेऽधिकारिणः च उपस्थिता आसन् । ऑनलाइनमाध्यमेन संचालिताः एते सितम्बरमासिकवर्गाः संस्कृतभाषाभाषणमहत्त्वं प्रकाशयन्तः सप्तप्रेरकसत्रैः समाप्ताः। संस्था प्रतिमासं आयोजितानां कक्षाणां माध्यमेन विविधाः संगोष्ठीः आयोजयति यासु गोष्ठीषु विषयविशेषज्ञाः शिक्षिकाणां स्वभाषणेन मार्गदर्शनं कुर्वन्ति।

# पूर्वीचम्पारण्ये आगामियोजना-विषयिणी गोष्ठी सम्पन्ना

(गोपालकृष्णमिश्रः, प्रान्तसोशलमीडियाप्रमुखः, संस्कृतभारती-बिहारप्रान्तः)

संस्कृतभारती-बिहारप्रान्तस्य प्रान्त-सङ्घटन-मन्त्री डॉ० श्रवणकुमारमहोदयः पूर्वीचम्पारण्यजनपदस्य मोतिहारीनगरे विगतदिवसे गोष्ठीं स्वीकृतवान्। अत्र गोष्ठ्यां संस्कृतभारत्याः कार्यकर्तृणां संस्कृतानुरागिणाञ्च उपस्थितिः आवश्यकी आसीत्। गोष्ठ्याम् आहत्य १२ जनाः उपस्थिताः आसन्, यस्यां विस्तारकवर्गविषये तथा च शिविरचालकाभ्यासवर्गविषये वार्ता अभवत्। अस्यां गोष्ठ्यां मोतिहारीनगरस्य नगरमन्त्रिणः डॉ विश्वजित् बर्मनमहोदयस्य तथा च प्रान्त-सोशलमीडिया-प्रमुखस्य गोपालकृष्णमिश्रस्य अपि उपस्थितिः



आसीत्। सङ्गठनमन्त्रिणा साकं मुजफ्फरपुरस्य जिलासंयोजकः अखिलेशः अपि आगतवान् आसीत्। इतोऽपि ताराकान्तमित्रः, अरविन्दतिवारी, बलिरामः, श्यामसुन्दरः, लालू, प्रत्यूषः, यशवन्तः, निखिलः चक्रवर्ती उपस्थिताः आसन् ।

गोष्ठ्यामस्यां चर्चितेषु विषयेषु एवं कार्यकर्तारः स्वदायित्वविषये अङ्गीकारं कृतवन्तः -

आशास्पदविस्तारकप्रशिक्षणवर्गार्थम् -

१. श्रीमान् यशवन्तकुमारः (स्नातकतृतीयवर्षे)

२. श्रीमान् निखिलः चक्रवर्ती (स्नातकतृतीयवर्षे)

शिबिरसञ्चालनवर्गार्थम् -

१. श्रीमान् अरविन्दः तिवारी (बीपीएससी शिक्षकः)

२. श्रीमान् बलिरामः (स्नातकोत्तर-द्वितीयवर्षे)

३. श्रीमान् श्यामसुन्दरः (स्नातकतृतीयवर्षे)

संस्कृतविकासवर्गार्थम् -

१. अभिषेकः/ लालू (द्वादशीकक्षायाम्)

२. प्रत्यूषः (स्नातकतृतीयवर्षे)

गोष्ठीस्वीकरणात् पूर्वं सङ्घटनमन्त्री डॉ० श्रवणकुमारः महोदयः पूर्वीचम्पारण्यजनपदस्य अध्यक्षेण प्रो० रामनिरञ्जन-पाण्डेयमहोदयेन सह मेलनं कृतवान्। यत्र अध्यक्षैस्साकम् एवं विषयाः चर्चिताः -

१. उपाध्यक्षस्य, जिलामन्त्रिणः, नगरमन्त्रिणाञ्च नियुक्तिः वार्ता कृत्वा यथाशीघ्रं भवेत्।

२. जिलानगरयोः समितेः निर्माणं भवेत्।

३. मासिकी एका गोष्ठी निश्चयेन भवेत्।

४. दिसम्बरमासे जनपदनगरयोः विस्तारनिमित्तं प्रान्तसङ्घटनमन्त्रिणः डॉ० श्रवणकुमारमहोदयस्य जिलाध्यक्षमहोदयेन प्रवासः स्वीकृतः।

सोशलमीडियाप्रमुखेन गोपालकृष्णमहोदयेन उक्तं यत् नवम्बरमासान्ते आशास्पदविस्तारकानां वर्गः गयानगरे भविष्यति तथा च दिसम्बरमासे शिबिरचालकप्रशिक्षणवर्गः भविष्यति यत्र बिहारप्रान्ततः अपेक्षिताः कार्यकर्तारः तस्मिन् वर्गे प्रशिक्षणं प्राप्स्यन्ति इति। सोशलमीडियाप्रमुखः उक्तवान् यत् संस्कृतभारत्याः बिहारप्रान्तेन अग्रे गीताजयन्तीमुपलक्ष्यापि आभासीयं श्रीमद्भगवद्गीतायाः अष्टादशाध्यानां पारायणं दिसम्बरमासस्य ११तमे दिनाङ्के भविष्यति इति।

# संस्कृताध्ययनद्वारा अस्माभिः यत्नेन वृत्तरक्षणं करणीयम्- डॉ.रत्नेशकुमारत्रिवेदी

वार्ताहरः आचार्यदीनदयालशुक्लः

उत्तरप्रदेशः/लखनऊ/उत्तरप्रदेशसंस्कृतसंस्थानद्वारा निदेशकस्य विनयश्रीवास्तवस्य मार्गदर्शने संचालितायाः ऑनलाइन-प्रशिक्षण-पाठ्यक्रम-निर्माणयोजनांतर्गते सरलसंस्कृतसंभाषणकक्षायां प्रेरणासत्रस्य शुभारंभः





निवेदितया सरस्वतीवन्दनया कृतः। संस्थानगीतिकां प्रशिघ्क्षुना स्वागतगीतं छात्रेण च कृतम्। आगतानाम् अतिथीनां मुख्यवक्तृणां स्वागतं परिचयं च समन्वयकः दिव्यरंजनमहोदयः कृतवान् । सत्र-संचालनं प्रशिक्षकः राजनदूबे कृतवान्। कक्षागत-अनुभवकथनं अनुराधा शर्मा च अथच संस्कृतलघुकथां मानवीरायः प्रस्तुतवती च। गीता-ध्यानश्लोकम् आशामहोदया प्रस्तुतवती।

प्रेरणासत्रस्य मुख्यवक्तारः श्रीवामदेवसंस्कृतमहाविद्यालयः, बाँदा (चित्रकूटधाम) इत्यस्य संस्कृतविभागध्यक्षाः एवं प्रवक्ता डॉ. रत्नेशकुमारत्रिवेदीमहोदयाः ये खलु उत्तरप्रदेशसंस्कृतसंस्थानम् लखनऊ इत्यस्य सदस्याः आसन। तैः स्वकीये वक्तव्ये उपस्थितान् जनान् उक्तं यत् संस्कृतम् अस्माकं भारतीयसंस्कृत्याः निधिरस्ति। अस्माकं अस्य उपरि गर्वानुभूतिः भवेत् च। अस्य प्रचारः प्रसारः अस्माकं दायित्वमस्ति। यदा अस्माकं संस्कृतिः स्वयमेव परिपूर्णा अस्ति चेत् वयं पाश्चात्यसंस्कृत्याः अनुसरणं किमर्थं कुर्मः ? ते स्वकीये वक्तव्ये कानिचित् उदाहरणानि सम्मिलितं कुर्वन्तः प्रशिक्षुकान् बोधितवन्तः यत् अस्माभिः सर्वदा सरलरीत्या अभिनयेन सह वक्तव्यम् च। अन्यान् जनान् अपि संस्कृतं पठितुं प्रेरणीयम्। जनाः संस्कृते रोजगाराणां विषयेषु अपि जागरूकाः करणीयाः।

प्रशिक्षकः ओमदत्तद्विवेदी आगतानां अतिथीनां धन्यवादं ज्ञापितवान्। कार्यक्रमेऽस्मिन् उत्तरप्रदेश संस्कृतसंस्थानस्य निदेशकः विनयश्रीवास्तवः, प्रशासनिकाधिकारी जगदानंदझा, दिनेशमिश्रः, योजनाप्रमुखः भगवानसिंहः, प्रशिक्षणप्रमुखः सुधिष्ठमिश्रः, समन्वयकाः धीरजमैठाणी, दिव्यरंजनः तथा राधाशर्मा, प्रशिक्षकौ गणेशदत्तद्विवेदीशशिकान्तौ इत्यादयः उपस्थिताः आसन्। शान्तिमंत्रं आर्यनद्विवेदी, सूचनादानं प्रशिक्षकः विनोदत्रिपाठी तकनीकी-सहयोगं च कृतवान्। कल्याणमन्त्रेण कार्यक्रमस्य सम्पूर्तिरजायत्।

# रामनगर-महाविद्यालये हर्षोल्लासेन समाचरितः एनसीसी-दिवसः

(सांस्कृतिक- कार्यक्रमाणामायोजनम्)

वार्ताप्रेषकः- डॉ. मूलचन्द्रशुक्लः

रामनगरम्।पीएनजी राजकीय- स्नातकोत्तर-महाविद्यालय-रामनगरस्य एनसीसी द्वारा एनसीसी दिवसः हर्षोल्लासेन समाचरितः।एनसीसी ७९ एवञ्च २४ यूके बटालियन इत्यनयोः विभिन्नाः सांस्कृतिक-कार्यक्रमाः समायोजिताः। प्रभारी प्राचार्य प्रो.अनीता जोशी इत्यनया कार्यक्रमस्य




आध्यक्ष्यं निर्व्यूढम्। अनया समस्त-एनसीसीविद्यार्थिभ्यः(कैडेट्स) एनसीसी-दिवसस्य वधापनानि प्रदाय तेषां/तासाञ्च समुज्ज्वलभविष्यस्य कामना अभिव्यक्ता। मुख्यातिथिः उत्तराखण्ड-विद्यालयशिक्षा- परिषदः सचिवः विनोद प्रसाद सिमल्टी वर्यः राष्ट्रनिर्माणे यूनां भूमिका इत्यस्मिन् विषये स्वविचारान् प्रकटयति। सः एनसीसी विद्यार्थीनां कृते (कैडेट्स) एनसीसी इत्यस्य लाभान् उद्गीर्य तेभ्यः राष्ट्रसेवायै च प्रेरयति। ७९ बटालियन इत्यस्य एएनओ लेफ्टिनेंट (डॉ.)डी.एन. जोशी महोदयेन व्यक्तित्वविकासे एनसीसी इत्यस्य भूमिकाविषयिणी वार्ता विस्तीर्यते। २४ यूके बटालियन इत्यस्य एएनओ लेफ्टिनेंट (डॉ.) कृष्णा भारती महोदया एकता- अनुशासनयोर्धारणाय युवजनान् आह्वयति। सांस्कृतिककार्यक्रमेषु कवितापाठः, समूहनृत्यम्,एकल नृत्यम् इत्यादयः प्रस्तुताः। कैडेट आकांक्षा, दिव्या च एनसीसी-दिवसे स्वविचारान् व्यक्तीकुर्वन्त्यौ कवितापाठञ्च कृतवत्यौ। पूर्वछात्रा (कैडेट) रचना परिहारः राष्ट्रसेवायां तत्पराणां सैनिकानां जीवनोद्दिश्य स्वरचितकवितावाचनं कुरुते।एकलनृत्ये ममता नेगी सचिनभारद्वाजः च लोकनृत्यं प्रस्तुतवन्तौ।समूहनृत्ये आकाशः,हर्ष कुमारः, अरमानः,तनिष्का, आशा, नेहा,राशि इति विद्यार्थिनः लोकसंस्कृतेः वातावरणं निर्माय दर्शकान् मन्त्रमुग्धवत् अकुर्वन्। तत्रैव भावना मेहरा,सिमरन, भावना,गायत्री,शीतलः,ख़ुशी च इत्येसां प्रस्तुतयः करतलध्वनिना पुरस्कृताः।अस्मिन्नवसरे विद्यार्थिनः (कैडेट्स) प्राचार्येण मुख्यातिथिना च सम्मानिताः। तत्र एनसीसी स्थापनादिवसोपलक्ष्ये रक्तदानकर्तारः आकाश कुमारः, कुनाल सिंह सैनी,करन कोहली चेति त्रयः छात्राः प्रमाणपत्रपुरस्सरं सम्मानिताः। नमामि गंगे इत्यत्र स्वविशेषावदानकर्तारः छात्राः सुमितः,पारूलः,हिमांशुः मुकेश रावतः च एते प्रमाणपत्राणि प्रदाय सम्मान्यन्ते। कार्यक्रमे शोधाधिकारी मनीष सुयालः, डॉ.अरूणा पाण्डेया,विजयसिंहः, प्रकाशचन्द्रः,मदनभारती इत्यादयश्च उपस्थिता आसन् । सक्षम चौहानः, श्रेया रावतः, ज्योति सती, सुमितः, ख़ुशी, ज्योतिः, सूरजः, मनोजः,महकः,आशुः ज्योतिराणा इत्यादयश्च विशेषसाहाय्यमकुर्वन्। कार्यक्रमस्य सञ्चालनम् एनसीसी (कैडेट) तनुजा जोशी इत्यनया विहितम्।

# जीविकाप्राप्तये मानसिक- सक्रियता अत्यावश्यकी: प्रो.एम.सी.पाण्डे

वृत्तप्रेषकः-डॉ. मूलचन्द्रशुक्लः

रामनगरम्। मुख्यातिथिना प्राचार्येण प्रोफेसर एम. सी. पाण्डे वर्येण युवासंवादकार्यक्रमे उच्यते यत् जीविकाप्राप्तये मानसिकसक्रियता अत्यावश्यकी वरीवर्ति।पी.एन.जी. राजकीय- स्नातकोत्तर-महाविद्यालय-रामनगरस्य कैरियर काउंसलिंग प्रकोष्ठद्वारा छात्रछात्राभ्य उद्योगावसरलाभाय (काउंसलिंग) कार्यक्रमः



समायोजितः। विज्ञान- सङ्कायस्य विद्यार्थिभिः सह अजीम प्रेमजी फाउंडेशन द्वारा युवा-संवाद-श्रृंखलाक्रमे छात्रछात्राणां मध्ये संवादो विहितः। अस्य संवादस्योद्देश्यं विद्यार्थिषु व्यक्तित्त्वविकासः, मानसिकसक्रियता,निर्णयक्षमता इत्यादीनां विकासकरणार्थमासीत्। उद्योगप्राप्त्यर्थं स्वस्य मानसिकयोग्यता सह तत्र सम्यक् अवधानमपि आवश्यकमस्ति।अनेन माध्यमेन लिङ्गम्, जीवनमूल्यम्,सहभागिता, सामाजिकभागीदारी,समुचित -भागीदारी इत्याद्यर्थं छात्रछात्राभ्यः प्रोत्साहनं परमावश्यकं विद्यते।अद्यतन-विचारश्रृंखलायां विज्ञानसङ्कायतः प्रो. जे.एस.नेगी, डॉ.मनोज नैनवालः, कैरियर काउंसलिंग प्रकोष्ठस्य संयोजकः डॉ.अनुराग श्रीवास्तवः समुपस्थिता आसन्।महाविद्यालय स्य प्राचार्यः प्रो.एम.सी.पाण्डे महोदयः समस्तछात्रछात्राभ्यो भविष्ये उद्योगलाभाय शुभकामनाप्रदानपुरस्सरं प्रेरितवान्।तत्र तनिशा, अफीफा,प्रियंका,नीलम तिवारी, ललित चंद्रा, मिथलेश इत्यादयः त्रिषष्टिः (६३) विद्यार्थिनः प्रतिभागितामकुर्वन्।कार्यक्रमस्य सञ्चालनं अजीम प्रेमजी फाउंडेशन इत्यस्य सहयोगी आदित्य कोटबागी इत्यनेन कृतम्।

# 39 तमायां राष्ट्रिय-बास्केटबॉल-प्रतियोगितायां गायत्रीरौतेला इत्यस्याः चयनं सञ्जातम्

वृत्तहरः- डॉ. मूलचन्द्रशुक्लः



रामनगरम्। रामनगरस्य बालिका याः गायत्री रौतेला इत्यस्याः चयनं ३९ तमायां राष्ट्रिय-बास्केटबॉल- प्रतियोगितायां सञ्जातम्। बास्केटबॉल फेडरेशन ऑफ इण्डिया द्वारा ३९ तम-राष्ट्रिय-बास्केटबॉल-बालक-बालिकयोः चैम्पियनशिप-इत्यस्य आयोजनं क्रियते।आयोजनमिदं पश्चिम-बङ्ग राज्यस्य कोलकाताक्रीडाङ्गणे भविष्यति,यत्र गायत्री नवम्बर-मासस्य अष्टाविंशतिर्दिनाङ्कात् (२८)बालिकावर्गे प्रतिभागं करिष्यति। रामनगरनिवासी कुशाग्रबुद्धियुता गायत्री रौतेला एमपी हिन्दू इण्टर कालेज इत्यस्मिन् दशमकक्षायाः छात्रा वर्तते। गायत्री रौतेला इत्यस्याः पिता पीएनजी-राजकीय-स्नातकोत्तर-महाविद्यालये रसायनविज्ञानविभागे प्रयोगशाला-सहायकपदे कार्यरतो विद्यते। तस्याः माता उमा रौतेला गृहिणी अस्ति। पित्रा उक्तं यत् गायत्री नेशनल चौंपियनशिप इत्यर्थं राजस्थानराज्यस्य कोटानगरे समायोजितायां प्रतियोगितायामपि प्रतिभागितामकरोत् ।आरम्भादेव गायत्री बास्केटबाल क्रीडायाः एका महती क्रीडिका अस्ति, यया विभिन्नस्थानेषु आयोजित- प्रतियोगितासु नैकानि पदकानि अर्जितानि। सम्प्रति रामनगर-महाविद्यालये आयोजितायां महिला-बास्केटबाल-प्रतियोगितायामन्तिममेलने विजयीसङ्घे अधिनायिका आसीत्। अस्यामुपलब्धौ नैके गणमान्याः वर्धापनानि बालिकायै दत्तवन्तः, तत्र गुरूजनाः,परिजनाः रामनगर- महाविद्यालयस्य प्राचार्यः प्रो.एम.सी.पाण्डे वर्यः, चीफ प्रॉक्टर प्रो.एस.एस. मौर्यः, प्रो.जे.एस.नेगी, क्रीड़ा प्रभारी डॉ.योगेश चन्द्रः,डॉ. मूलचन्द्रशुक्लः,डॉ.डी.एन.जोशी चेत्यादयः सन्ति। सर्वैरपि गायत्री इत्यस्याः समुज्ज्वलभविष्यस्य आकाङ्क्षा अभिव्यक्ता। एषा बालिका स्वसाफल्यस्य श्रेयः माता-पितृभ्यां,गुरुजनेभ्यः,प्रशिक्षकाभ्यां मयंक, सञ्जय रावत इत्युभाभ्यां च प्रायच्छत्।

# बालभारतीपब्लिकविद्यालये समायोजिता वार्षिकप्रदर्शनी

वार्ताप्रेरकः- सौरभः दे (बालभारतीपब्लिकविद्यालयतः, एनटीपीसी-ओडिशा)

एनटीपीसी दर्लिपालीस्थिते बालभारतीपब्लिकविद्यालये २७ नवम्बर २०२४ तमे वर्षे अत्यन्तं हर्षोल्लासेण च विस्तृततया वार्षिकप्रदर्शनं यंग माइंड्स कॉन्क्लेव् तथा स्वादविनोदसङ्गमः - फूड् एंड फन फिएस्टा २.० (The Young Minds Conclave and The Frolic of Cuisine and Recreation –The Food and Fun Fiesta 2.2)आयोजितम्। अस्य वार्षिकप्रदर्शनस्य मुख्यं उद्देश्यं एन् ई. पी.(NEP) - २०२०



अनुकूलं विद्यार्थिनां प्रतिभां प्रकाशितुं, प्रायोगिकज्ञानं (Experiential learning) तेषां विचारान् च प्रस्तुत्यं, तेषां चिन्तनस्य सृजनात्मकता च वैज्ञानिकदृष्टिकोनं वृद्धिं कर्तुं, तथा तेषां रचनात्मकं सामाजिककौशलं च प्रकाशितुं आसीत्। अस्मिन वार्षिकप्रदर्शने विज्ञानं एवं तंत्रज्ञानस्य विषये ('The Mind of Brainiacs') सामाजिकविज्ञानं, भाषाशास्त्रं साहित्ये च ('World, Words and Wisdom') कला एवं तस्य रूपे ('Colours and Rhythm') इत्येषां नाम्नां सह ६८ प्रदर्शनीस्थलानि आयोजीतानि। "अतिथिदेवो भव" ख्र इतिकारणात् वार्षिकप्रदर्शनस्य मुख्यातिथि 'श्रीरामभजनमलिक' (हेड ऑफ प्रोजेक्ट, एनटीपीसी दर्लिपाली), विशिष्टातिथि 'श्रीमती पूनममलिक' (अध्यक्ष, अभिलाषा लेडिज क्लब) च अन्य गणमान्य अतिथिगणाः 'श्रीमती प्रतिभा सिंह' (अतिरिक्त महाप्रबंधक-मानवसंसाधन, एनटीपीसी दर्लिपाली), 'श्रीमती अपराजिता मिश्रा' (सी.एम.ओ - निरमाया हॉस्पिटल) उपस्थिताः। प्रदर्शनीमध्ये निर्णायकपदं आयोजयित्वा श्री रौनक सिंह राणा, शेखर तिवारी, इतिश्री जेना, मनोज कुमार, पल्लवी भट्टाचार्य, आयुषी जैन इत्यादयः निर्णायकाः उपस्थिताः।वार्षिकप्रदर्शनस्य उद्घाटनं मुख्यअतिथ्या हस्तेण फीतेन काट्य गणेशवन्दनायाः साथेन आरभत। अस्मिन् वार्षिकप्रदर्शनमध्ये २०२४ तु सिद्धम्-शिक्षायाः क्षेत्रे, कला, विज्ञानं साहित्ये च विद्यार्थिनः अकादमिकक्षेत्रे सर्वथा उत्तमेभ्यः अधिकतया प्रतिभाः यथावत् प्रकाशितुं सक्षमाः सन्ति इति प्रमाणीकृतम्। प्रदर्शनीसमापनं विद्यालयस्यादरणीयाः प्रधानाचार्यायाः श्रीमती नीरजा तिवारी महोदया च कुशलनेतृत्वेण सफलतया कृतवत्यः।

# अमरवाणीकविपरिषदा मासान्तकविगोष्ठी सम्पन्ना

वार्ताहरः पंकजझाः

अमरवाणीकविपरिषत् मासान्तं कविगोष्ठीमायोजयति नवम्बर मासस्य २९/१२/२४ दिनांके कविसमवाये




सहृदयाः काव्यपाठमकुर्वन्। तत्र परमाध्यक्षाणाम् आचार्यरहसबिहारिगुरुवर्याणामाशिषा , अध्यक्षवराणाम् आचार्यनिरंजनमिश्राणां सौजन्येन डॉ. सूर्यकान्तत्रिपाठिबन्धोः स्वागतधन्यवादवचनेन प्रियकविपंकजझासंचालनेन मासिकी कविगोष्ठी पूर्णा। अस्मिन् मासे येषां काव्यपाठेन वयमानन्दितास्तेषु डॉ. विपिन द्विवेदी, डॉ. दीपकमिश्रः पण्डितराज दीपक मिश्र, डॉ. प्रागेशमिश्रः, डॉ. श्रीनाथधरद्विवेदी,डॉ. प्रीतिपुजारा, प्रो. राजेन्द्रत्रिपाठी रसराजः,डॉ. सूर्यकान्तत्रिपाठी, डॉ. पंकजझाः,आचार्याः सिंहासनपाण्डेयाः , कविवरो निरंजनमिश्रः, कविवरः पी. सुरेन्द्रन्, डॉ अरविन्द कुमार तिवारी, एते सन्ति। अमरवाणीकविपरिषदः इदं लक्ष्यं वर्तते यत् ये केऽपि संस्कृते प्रारम्भिकीं प्रौढां वा रचनां कुर्वन्ति तेषां कृते एकः समीचीनो मंचो भवेत् यस्मिन् आगत्य प्रारम्भिककवयः ज्येष्ठानां कवितया प्रेरणां संगृह्य स्वकीयप्रतिभायाः विकासं कर्तुं पारयेयुरिति भावेन इयं परिषत् प्रतिमासमेतादृशीं गोष्ठीं सम्पादयति।

# सम्पादकीयम्

सम्मान्याः सुरभारतीसमुपासकाः!

सादरं नमोनमः।

भारते नूतनशिक्षा नीतेः २०२० प्रवर्तनोत्तरं भारतीय ज्ञान परंपरा विषये निरंतरं चर्चा आरब्धास गतेभ्यःकेभ्यश्चिद् दशकेभ्य: भारतीय शिक्षा प्रणालीम् आधृत्य समय-समये अनेके प्रश्नाः उद्यन्ति। वस्तुतः आङ्ग्ल शासन काले एका चिन्तिताविगतारणनीतेः अनुरूपं भारतीय ज्ञान परंपरा ध्वस्ता। विज्ञानस्य आधुनिकतायाश्च नाम्ना आरब्धायाः पाश्चात्य शिक्षा प्रणाल्याः चलनम् अत्यन्तं तीव्रतया भारते विकसितम्। स्वातंत्र्योत्तरमपि अस्माकं देशस्य नीति निर्धारक नेतृत्वम् एतत् गंभीरतया न अचिन्तयत्। यस्य फल स्वरुपा भारतीय ज्ञान परंपरा विलुप्तास अद्य विश्वस्य परिवर्तमाने परिदृश्ये विभिन्न क्षेत्रेषु यत्र भारतं एकं स्वं स्थानं निर्माति तत्र वर्तमानः केंद्र सर्वकारः स्वपारंपरिक ज्ञानाधारित शिक्षा प्रणाल्याः आवश्यकता गंभीरतया विचिन्त्य विषयेऽस्मिन् कार्यम् आरब्धम्। यस्य फल स्वरुपेण भारतीय समाजे पुरातन भारतीय ज्ञान परंपराम् आधृत्य चिंतनं प्रारब्धम्। वास्तविकतया भारतीय संस्कृतेः संस्कृतस्य च मूलाधारो भारतीय ज्ञान परंपरा एव। भारतीय ज्ञान परंपरा भारतवर्षे प्राचीन कालाद् चल्यमाना। यस्यान्तर्गतानां वेदाः, वेदांगानि ,उपनिषदः, विभिन्न प्रकारेण दर्शनशास्त्रं, धर्मशास्त्रं, नाट्य शास्त्रं विज्ञानं च इत्येषाम् अध्ययनं भवति। यत् मानव जीवनाय अभीष्ट कल्याणकरं च। अस्याः शिक्षायाः उद्देश्येन नागरिकः सर्वांगीण विकासितः समाजपयोगी च भवति स्म। ऐतिहासिक पृष्ठभूम्या ज्ञायते यत् १८११तमे वर्षे अंग्रेजी शिक्षा व्यवस्था उदिता । तस्मिन् समये संपूर्ण भारतवर्षे में ७३२००० गुरुकुलानि कार्यरतानि । येषु भारतीय ज्ञान परंपराधारित शिक्षा दीयते स्म। अस्यां ज्ञान परंपरायाम् आचारः विचारः ,लौकिकं पारलौकिकं च, कर्म, धर्मः, भोगः त्यागः इत्येषाम् अद्भुत संगमः अवर्ततस अनेन प्रकारेण प्राचीन समयादेव शिक्षां प्रति भारतीय ज्ञान परंपरा अत्यंतं व्यापिका समृद्धा च। एतत् अत्यंतं निराशाजनकं यत् आधुनिकतायाः वैश्विकतायाश्च नाम्ना वयं स्व ज्ञान परंपरा विस्मरन्तः स्मः। वैश्विक शिक्षाधारेण भारतीय विश्वविद्यालयाः स्वीयं कञ्चन स्तरं न निर्मातुं पारयन्ति। अत्रत्य पुरातन परंपरानुसारं नैतिक सामाजिक मूल्यानि शिक्षा नीत्या सह सामजस्यं न स्थापयितुं पारयन्ति। यत्फलतः सहस्रशो युव विद्यार्थिनो विदेशेषु ज्ञान विज्ञान शिक्षायै पलायनं कुर्वन्ति। एतादृश स्थितौ देशस्य सर्वकाराणां दायित्वं यत् ते भारतीय ज्ञान परंपराणां विषयेभ्यो वैश्विक मान्यता दातुं तद्दिशि प्रभावकारिणीं नीतिं शीघ्रतया प्रवर्तेरन्। एतत् सुखदं यत् बहुषु निजी क्षेत्रेषु अस्य आरंभः जातः। हरिद्वार स्थितस्य पतंजलि योगपीठस्य प्रयासः श्लाघनीयः। येन भारतीय शिक्षा परिषदः स्थापनं कृत्वा एषा परंपरा सुदृढ़ीकर्तुं कार्यं विहितम्। अस्यां दिशि देशस्य कानिचन गुरुकुलानि ब्लू लेखन कार्यं कुर्वन्ति । विद्यार्थिनः पारंपरिक शिक्षया सह आधुनिक शिक्षामपि प्राप्नुवन्ति।

भवदीया

सम्पादिका

## ॥ वेद वाणी ॥

पूषा त्वेतो नयतु हस्तगृह्याश्विना त्वा प्र वहतां रथेन ।
गृहानाग्च्छ गृहपत्नी यथासो वशिनी त्वं विदथमा वदासि ॥
इह प्रियं प्रजया ते समृध्यतामस्मिन्गृहे गार्हपत्याय जागृहि ।
एना पत्या तन्वं सं सृजस्वाधा जिव्री विदथमा वदाथः ॥'

'May Pushan, the God of fortune, lead by holding bride's hand and walking in front. May Ashwinis make her seated in chariot and take her to her husband's home. May she occupy the position of female head of house and keep people and household in control. Let her be submissive to her husband and conduct herself wisely."'May her children remain in the best state of happiness.May she perform her functions as a dutiful wife properly. May she live happily and together with her husband. Both wife and husband may walk together thus in the path of dharma and grow old. They would,then,give the best instruction to their children.'"

**The Rig Veda 10.85.26/27**

'अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः ।
वीरसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे ॥'

O bride! Be of calm and peaceful mind.Never bring sorrow to your husband. Bring weal to cattle.Be radiant. Be gentle and of good heart. Be of noble and auspicious thoughts. Worship Gods. Bear heroes. Be beneficial to our quadrupeds and bipeds and bring them joy.'

The Rig Veda 10.85.44

**संकलन : एस.वासुदेव रावः**

# परमवैज्ञानिकीभाषा अस्ति संस्कृतम् - पद्मभूषणपूज्य-श्रीश्रीश्रीत्रिदण्डिचिन्नश्रीमन्नारायणरामानुजजीयरस्वामीजीमहाराजः

डॉ.दिनेश चौबे, उज्जयिनी

उज्जयिनीस्थ महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालये २६/११/२०२४तमे दिनाङ्के मङ्गलवासरे मध्याह्ने



पद्मविभूषितपूज्यश्रीश्रीश्रीत्रिदण्डिचिन्नश्रीमन्नारायणरामानुजजीयरस्वामीजीमहाराजानां शुभागमनं जातम्। महाराजानामभिनन्दनं कुर्वन् कुलगुरवः कुलसचिवश्च चरणपूजनं तथा च सम्मानपत्रार्पितवन्तः। कुलगुरुः प्रो. विजयकुमारः सी.जी. महोदयेन स्वागतभाषणम् एवञ्च महाराजपरिचयः प्रस्तुतः। हैदराबादसमीपे श्रीरामानुजाचार्यस्य विश्वस्य सर्वाधिक - उच्छ्रितप्रतिमायाः प्रतिष्ठापकः तेन माध्यमेन सामाजिकसमरसता तथा च समतायाः विश्वं प्रति संदेशप्रदाता श्रीचिन्नजीयरस्वामी स्वानुग्रह भाषणं मङ्गलाशासनमाशीर्वादं प्रददन् उक्तवान् यत् मानवजीवनात् प्रागेव वेदानां रचना जाता । तेन साहाय्येन सृष्टेः निर्माणं जातम्। सर्वं वेदे समाहितवं वर्त्तते। संस्कृतस्वीकार्ये विश्वकल्याणं सम्भवम्। संस्कृतभाषा आदिकालादेव संवादमाध्यमा आसीत्। समतायाः प्रतीको च अस्ति संस्कृतम्। ईश्वरविवेचनसमर्थो वेदः। ईश्वरः सर्वभूतानां वर्तते । अनुभूतिना तस्य स्वरूपो ज्ञायते। रामानुजादिप्रभृतेनापि संस्कृतभाषाश्रये स्थित्वा लोकोपयोगि कार्याणि कृतानि । कार्यक्रमे महाराजसाकं श्री वेङ्कटेश्वैदिकविश्वविद्यालयस्य आचार्यचरः राष्ट्रपतिसम्मानितः डॉ. एस्. वेङ्कटरंगरामानुजाचार्यः, जनकपुरीनेपालतः उभयवेदान्तश्रीकृष्णमाचार्यः, उज्जैनतः डॉ. शैलेन्द्रकुमारशर्म, डॉ. केदारनारायणजोशी, डॉ. संतोषः, डॉ. पीयूषत्रिपाठी, डॉ. गोविन्दगन्धे,आदि विशिष्टविद्वांसः तथा च सर्वे विभागाध्यक्षाः, प्राध्यापकाः, कर्मयोगिनः, शोधच्छात्राः, विद्यार्थिनः, एवञ्च सामाजिकजनाः उपस्थिताः आसन् सञ्चालनं डॉ. तुलसीदासपरुहामहोदयेन आभारज्ञापनं च कुलसचिवेन प्रो. दिलीपसोनी महोदयेन विहितम्।

# संस्कृतेन अनूदित-भारतीय-संविधानम् ऐतिहासिकी उपलब्धिः-प्रो श्रीनिवासवरखेडी

(अजय कुमार मिश्रा)

नवदेहली। केन्द्रीयसंस्कृतविश्वविद्यालय, दिल्ली इत्यस्य कुलपतिः प्रो श्रीनिवासवरखेड़ी संविधान दिवसस्य शुभकामनां ददत् उक्तवान् यत् भारतीय संविधान निर्माणस्य ७५तमं वर्षं पूर्णमित्युपलक्ष्य संस्कृत भाषया अनूदितस्य भारतीय संविधानस्य प्रतेः विमोचनं सर्वथा ऐतिहासिकम्।



प्रो वरखेड़ी प्रसन्नतां व्यक्तकुर्वन् कथितवान् यत् संस्कृतं भारतीय भाषाणां मूले विद्यते। एतदर्थं संस्कृतम् एकेन संयोजक रूपेण सदा स्वीयां महत्त्वपूर्णं भूमिकां निर्वहति। अतः एषः संस्कृत अनुवाद भारतीय भाषाणां न्यासेन सहैव सांस्कृतिक परिचयमपि समुन्नेष्यति। सः मनुते यत् भारतस्य अन्यास्वपि भाषासु अस्य अनुवादः राष्ट्रिय शिक्षा नीतेः २०२० तां भावनामपि संबलितां करोति यस्याः अन्तर्गतं भारतीय भाषाणां समुन्नयने प्रथमवारं समुचित रुपेण बलं दीयते।

एषः दिवसः बाबा साहब अंबेडकरस्य जयन्तीरूपेण मन्यते। यस्य सार्थकता एवं रूपेण अस्ति यत् तेन यासां सामाजिक-न्याय-समता-समरतानां कटिबद्धताभावनां विनिर्मातुं विश्वस्य सर्वाधिक विशालस्य भारतीय संविधानस्य निर्माणे अत्यंतं महत्त्वपूर्णं भूमिका निर्व्यूढा। तदीय सार्थकता अन्त्योदयपर्यन्तं प्राप्नुयात्।

# उत्तराखंड-संस्कृत-अकादमीद्वारा संस्कृतमहोत्सवस्य अंतर्गता राज्य-स्तरीय-संस्कृतच्छात्र-प्रतियोगिता सम्पन्ना

हरिद्वारम्। उत्तराखण्ड संस्कृत अकादमी द्वारा आयोजितायाः १६ तमस्य संस्कृत महोत्सवस्य क अन्तर्गतेन आयोजितायाः राज्य स्तरीय संस्कृतच्छात्र प्रतियोगितायाः समापनं विजेतृ प्रतिभागिभ्यः पुरस्कार



वितरणेन सह भूपतवालायाः महाजन भवने जातम् । कार्यक्रमस्य समापन सत्रे मुख्यातिथि रूपेण उत्तराखंड शासनस्य संस्कृत शिक्षा सचिवः दीपक गैरोला, संस्कृत शिक्षा निदेशकः डॉ आनन्द भारद्वाजः, उपनिदेशः संस्कृत शिक्षा डॉ पदमाकर मिश्रः, संस्कृत भारत्याः संगठन मंत्री गौरव शास्त्री सहायक निदेशकः नैनीतालं यशोदा प्रसाद सेमल्टी, उत्तराखंड संस्कृत अकादम्याः सचिवः डॉ वाजश्रवा आर्यः, अकादम्याः शोधाधिकारी डॉ हरीश चन्द्र गुरुरानी इत्येते संयुक्त रूपेण संस्कृत प्रतियोगितानां विजेतृ प्रतिभागिनः पुरस्कृत्य तेषां उत्साहवर्धनं कृतवन्तः । संस्कृत शिक्षा सचिवः दीपक कुमार गैरोला सभी विजेतृ प्रतिभागिभ्यस्स्वीय शुभकामनाः प्रदत्तवान्। तेनोक्तं यत् संस्कृतस्य प्रतियोगिताभिः छात्राणां व्यक्तित्वं प्रतिभा च वर्धते । संस्कृत निदेशकः डॉ आनन्द भारद्वाजः उक्तवान् यत् प्रतियोगिताभिः प्रतियोगिनां चतुर्मुखिविकासो । उपनिदेशकः डॉ पद्माकर मिश्रः राज्यस्तरीय संस्कृत प्रतियोगितानां बहुशः प्रशंसां कृतवान्। उत्तराखंड संस्कृत अकादम्याः सचिवः डॉ वाजश्रवा आर्यः समस्तातिथीनां माल्यार्पण द्वारा स्वागतं कृतवान्। समस्तागंतुक प्रतिभागिभ्यः, शिक्षक शिक्षिकाभ्यः संस्कृत मनीषिभ्यः आभारं प्रकटीकृतवान्। प्रकाशनाधिकारी डॉ किशोरी लाल रतूड़ी कथितवान् यत् राज्य स्तरीय संस्कृतच्छात्र प्रतियोगितासु पूर्णराज्यात् ९०० तः अधिकाः प्रतिभागिनः समेत्य १२०० संस्कृत प्रेमिणः उपस्थिताः आसन्। समापन समारोहस्य संचालनम् उत्तराखंड संस्कृत अकादम्याः शोध-अधिकारी डॉ हरीश चन्द्र गुरुरानी अकरोत् ।

द्विदिवसीय राज्य स्तरीय संस्कृतच्छात्र प्रतियोगितानाम् अन्तर्गते कनिष्ठ वर्गे ६, वरिष्ठ वर्गे ६ आहत्य १२ प्रतियोगितानां आयोजनं विहितम् । राज्य स्तरे आहत्य चतुरशीतिसहस्राधिकद्विलक्षं (२,८४,०००) रुप्यकाणां पुरस्कार राशेः वितरणं जातम्।

प्रतियोगितासु कनिष्ठ वर्गस्य चल वैजयंती, उधम सिंह नगरम्, उप वैजयंती पौड़ी चमोली जनपदश्च संयुक्त रूपेण प्राप्नोत्। वरिष्ठ वर्गे चल वैजयंती पौड़ी उप वैजयंती देहरादून जनपदः प्राप्नोत्।

अवसरेस्मिन् अकादमीतऽ प्रशासनिक अधिकारी लीला रावतः, डॉ, अकादम्याः वित्त अधिकारी सत्येन्द्र डबरालः, सहायक निदेशकः देहरादूनं चंडी प्रसाद घिल्डियालः, संदीप उपाध्यायः, सामश्रवा आर्यः, डॉ कंचन तिवारी, कुलदीप मेंदोला, डॉ वेदव्रतः, प्रो परमेशः, डॉ नवीन पंतः, प्रकाश तिवारी, डॉ ललिता, डॉ कमलेश कुमारः, अकादम्याः प्रकाशन अधिकारी डॉ किशोरी लाल रतूड़ी, सहायक पुस्तकालयाध्यक्षः रमा कठैतः, दिव्या पालीवालः, पंकज नेगी, मोहितः, गणेश फोन्दणी, विवेकः, डॉ दिनेश चन्द्रः, डॉ नरेन्द्र पांडेयः, डॉ पुष्पांजलि अग्रवालः, डॉ चन्द्रप्रकाश उप्रेती, डॉ जानकी त्रिपाठी, डॉ विजय कुमार त्यागी, डॉ महावीर गैरोला, डॉ अजीत कुमारः, डॉ प्रिया पांडेयः, डॉ आनन्द जोशी, डॉ गिरीश चन्द्र तिवाड़ी, डॉ वाणीभूषण भट्टः, रोशन लाल गौड़ः, गौरव शास्त्री, योगेश शर्मा, डॉ प्रकाश चन्द्र जोशी इत्येतान् समेत्य विभिन्न विद्यालयानां, महाविद्यालयानां, आचार्याः, प्राचार्याः संस्कृतक्षेत्रस्य विद्वज्जनाः विजेतृ प्रतिभागिनाम् उत्साहवर्धनं कृत्वा कार्यक्रमस्य शोभाम् अवर्धयन्त।

## वैश्विकसंस्कृतमञ्चः, गोरखपुरम् एवं काव्यसुधामन्दाकिनीति संस्थयोस्संयुक्तायासेन संस्कृतकविगोष्ठी सुसम्पन्ना

गोरखपुरम्। ३०/११/२०२४ तमे दिनांके शनिवासरे वैश्विकसंस्कृतमञ्चः, गोरखपुरम् एवं काव्यसुधामन्दाकिनीति संस्थयोस्संयुक्तायासेन संस्कृतकविगोष्ठी सुसम्पन्ना। अस्याः कविगोष्ठ्याः आरम्भः डॉ० रङ्गनाथत्रिपाठिमहोदयस्य वैदिकेन मङ्गलाचरणेन जातः। आध्यक्ष्यं गुर्जरप्रदेशतः श्रीमत्यः डॉ० हिमांशुयोगिनीव्यासवर्या निरूढवती।




महाकविकालिदासमभिलक्ष्य कवयः स्वकीयं काव्यं प्रस्तुतवन्तः। तत्र सर्वप्रथमं उत्तराखण्डप्रदेशतः प्रकाशपन्तमहोदयेन देवभूमेः उत्तराखण्डस्य महिमानवेक्ष्य जयतु जयतु दिव्या देवभूमी मदीया शीर्षाङ्कितं मनोहारिगीतं प्रस्तुतम्। अनन्तरं बागपतः सुकविना डॉ० अरविन्दकुमारतिवारीमहोदयेन बाङ्ग्लादेशे हिन्दुजनानां पीडा स्वकाव्यलवेन प्रस्तुता। तदनु डॉ० हेमन्तवेलवाल-डॉ० प्रियंका-डॉ०श्रीनाथधरद्विवेदि-डॉ० विपिनद्विवेदि-डॉ० अभिषेकपाण्डेय-डॉ०अम्बरीशकुमारमिश्र-डॉ०श्रवणकुमारमणित्रिपाठि-आचार्यविवेककुमारपाण्डेयानां कालिदासोपनिबद्धानि काव्यानि प्रस्तुतानि। अन्ते आध्यक्षीयोद्बोधनेन कार्यक्रमः सुसम्पन्नः। कार्यक्रमस्य सुष्ठु सञ्चालनम् आचार्यविवेकेन आसादितम्। शान्तिमन्त्रेण काव्यगोष्ठी सम्पूर्णताङ्गता।

## ऋग्वैदिकसूक्तौ इन्द्रविजयाभिनन्दने भारतवर्षस्य ऐतिह्यम्

– डॉ. लक्ष्मीकान्तविमलः

श्रीशंकरशिक्षायतनेन वैदिकशोधसंस्थानेन अक्टूबरमासस्य ३०तमे दिनांके सायंकाले ५ वादनतः ७ वादनपर्यन्तम् अन्तर्जालीयमाध्यमेन एका राष्ट्रिया संगोष्ठी समायोजिता। पण्डितमधुसूदनओझामहोदयस्य इन्द्रविजयस्य पञ्चमाध्यायस्य विविधविषयं चाधारीकृत्य इयं राष्ट्रिया संगोष्ठी प्रवर्तिता।

वाराणसीस्थस्य केन्द्रीय-उच्च-तिब्बती-शिक्षा-संस्थान-मानित-विश्वविद्यालयस्य शब्दविद्यासंकायस्य संस्कृतविभागस्य आचार्यः प्रो. धर्मदत्तचतुर्वेदिमहोदयः अकथयत् यद् इन्द्रविजयस्य ग्रन्थस्य पञ्चमाध्याये इन्द्रस्य विजयाभिनन्दनम् अस्ति। इन्द्रस्य अभिनन्दने कण्वस्य पुत्रस्य पौत्रस्य अभिनन्दनवाक्यम् ऋग्वेदतः




संकलितोऽस्ति। वत्सः, श्रुष्टिगुः, मेध्यः एते कण्वस्य पुत्राः सन्ति। गोषूक्तिमाध्यमेन अश्वसूक्तिमाध्मेन कण्वस्य पौत्रः इन्द्रस्य अभिनन्दनं चकार। नोधा गौतमः, अङ्गःश्च इन्द्रस्य अभिनन्दनं निवेदयामास। अभिनन्दनेन प्रसन्नः इन्द्रः सोमपाने कुत्सस्य सगभागित्वं इन्द्रसदृशं स्वरूपं च निर्धारयामास।

**महसि च मघवानिन्द्रो महसा परितोषितः प्रददौ।**
**कुत्साय तत्र तस्मै सोमे सग्धिं स्वसारूप्यम् ।।**इन्द्रविजयः पृ. ५२७, का.४

विजयाभिनन्दनानन्तरं देवराजः इन्द्रः स्वर्गं गतवान्। कुत्सेन सह इन्द्रः स्वर्गं गतवान् । स्वर्गेऽपि विजयाभिनन्दनस्य आयोजनं जातम्। इन्द्रस्य सत्कारेण, मानेन, दानेन कुत्सः सम्मानितो जातः।

**अमरावत्यामिन्द्रः स्वीयं सदनं समासाद्य।**
**सत्कार-दान-मानैः कुत्सं संभावयामास॥** तत्रैव पृ. ५३१, का. १

पञ्चामाध्याये उदाहृतस्य छन्दसः नाम्ना उल्लेखः स्वरेण वक्तृभिः चतुर्वेदिमहोदयैः कृतः।

असमनगरस्थस्य कुमार-भास्कर-वर्म-पुरातनाध्ययन-विश्वविद्यालयस्य न्यायविभागस्य सहायकः आचार्यः डॉ. राजीवलोचन-महोदयः अकथयत् यद् इन्द्रविजयग्रन्थस्य पञ्चमाध्यायस्य इन्दविजायाभिनन्दने गृत्समदः वामदेवश्च इन्द्रं प्रशंसयामास। इन्द्रः स्वचरितं वामदेवं श्रावयामास। ऋग्वेदस्य मन्त्रे इन्द्रस्वरूपम् अनेन प्रकारेण विद्यते। इन्द्रः कथयति अहं मनुः अस्मि, अहं सूर्यः अस्मि, अहं बुद्धिमान् कक्षिवान् ऋषिः अस्मि, अर्जुनस्य पुत्रः कुत्सः अस्ति। तम् अहं समर्थयामि, अहं दूरदर्शी उशना कविः अस्मि। माम् इन्द्रं त्वं वामदेवं पश्य।

**अहं मनुरभवं सूर्यश्चाहं कक्षीवाँ ऋषिरस्मि विप्रः।**
**अहं भूमिददामार्यायाऽहं वृष्टिं दाशुषे मर्त्याय॥**

ऋग्वेदः ४.२६.१; इन्द्रविजयः पृ. ५११

गोरखपुरस्थस्य दीन-दयाल-उपाध्याय-गोरखपुर-विश्वविद्यालयस्य संस्कृतविभागस्य सहायकाचार्या डॉ. रञ्जनलतामहोदया कथितवती यत् यस्मिन् समये आर्यप्रमुखः कुत्सः, दस्युः अनार्यः, द्वयोर्मध्ये महान् संग्रामः सञ्जातः। दस्युः कुत्सेन पराजितः। कुत्सस्य सहायकः इन्द्रः आसीत्। यदा संग्रामः सुसंपन्नो गतः तदनन्तरम् इन्द्रं निजस्वर्गं गन्तुं सन्नद्धोऽभूत। तदा कुत्सः इन्द्राय विजयाभिनन्दनम् आयोजितवान्। तस्मिन् क्रमे बहवः ऋषयः, राजानः, देवाश्च इन्द्रस्याभिनन्दं कृतवन्तः।

**दस्यूनां विग्रहादार्याणां च स्वराज्यसंप्राप्तेः।**
**सुस्थेऽत्र सर्वलोके स्वर्गायेन्द्रः स गन्तुमभ्यैच्छत् ॥** तत्रैव पृ ४७५, का. १

जवाहरलाल-नेहरू-विश्वविद्यालयस्य संस्कृत-एवं-प्राच्यविद्या-अध्ययन-संस्थानस्य आचार्यः प्रो. सन्तोषकुमारशुक्लवर्यः कार्यक्रमस्य अध्यक्षः आसीत्। तेन कथितं यत् वर्तमानसन्दर्भे इतिहासस्य कीदृशी दृष्टिः स्वीकरणीया स्यात् । आधुनिके इतिहासे हड्प्पा इति नाम प्रसिद्धम् अस्ति। हड्प्पा इति नाम्ना एव भारतस्य ऐतिह्यं पुरातात्त्विकविद् स्वीकरोति। हड्प्पा इति पूर्वं भारतस्य साहित्याधारितम् इतिहासं पुरातात्त्विकविद् न स्वीकरोति। तर्हि इन्द्रविजयग्रन्थोक्तस्य इतिहासस्य का सङ्गतिः स्यात्। त्रिलोकी इति अवधारणायाः आधुनिकेन इतिहासेन सह कः संबन्धः भवेत्, इति अस्माभिः चिन्तनीयम्। द्युलोके देवताः भवन्ति, भूमौ मनुष्यः निवसति अन्तरिक्षे तिर्यग्योनिगतः पक्षी वर्तते। त्रिलोकीदृष्ट्या अपि इतिहासं भवितुम् अर्हति।

बुलन्दनगरस्य श्रीरुक्मिणी-वल्लभ-वेद-वेदाङ्ग-संस्कृतमहाविद्यालयस्य वैदिकाचार्यः डॉ. कमलराज-उपाध्यायः सस्वरं वैदिकमङ्गलाचरणं कृतवान् कार्यक्रमस्य सञ्चालनं श्रीशंकरशिक्षायतनस्य वैदिकशोधसंस्थानस्य शोधाधिकारी डॉ. लक्ष्मीकान्तविमलः कृतवान्। अस्मिन् कार्यक्रमे विविधेभ्यः प्रान्तेभ्यः विश्वविद्यालस्य महाविद्यालस्य आचार्याः शोधच्छात्राः विषायानुरागिणश्च सोत्साहं भागं गृहीत्वा संगोष्ठीं सफलीचक्रुः।

## केन्द्रीयसंस्कृतविश्वविद्यालय श्रीरणवीरपरिसरजम्मूद्वारा उत्तरक्षेत्रीयरूपकमहोत्सवे 2024 इत्यत्र राज्यपुरस्कृतो महन्तः रोहितशास्त्री सम्मानितः

वार्ताहरः- डॉ. मूलचन्द्रशुक्लः

जम्मूः-जम्मूस्थकेन्द्रीयसंस्कृतविश्वविद्यालयश्रीरणवीरपरिसरद्वारा आयोजिते द्विदिवसीये




उत्तरक्षेत्रीयरूपकमहोत्सवे २०२४ समाप्तिसमारोहे श्री कैलखज्योतिषवैदिकसंस्थानट्रस्ट इत्यस्य राज्यपुरस्कृत अध्यक्षः महन्तः रोहितशास्त्री सम्मानितः जातः।

समारोहे मुख्यातिथिः उत्तरजम्मूतः माननीयो विधायक आसीत्। आध्यक्ष्यं प्रोफेसर श्रीधरमिश्रवर्येण निर्व्यूढम्। विशिष्टातिथिः भ्रष्टाचारनिरोधकब्यूरोसंस्थानस्य निदेशकः शक्तिपाठकः सारस्वत-अतिथिः नवभारतटाइम्स-पत्रिकायाः पूर्वसम्पादकः राजेन्द्रभारद्वाजश्च आसीत्।

एतस्मिन्नेवावसरे महन्तेन रोहितशास्त्रिणा उक्तं यत् जम्मूस्थकेन्द्रीयसंस्कृतविश्वविद्यालयश्रीरणवीरपरिसरस्य निदेशकप्रोफे. श्रीधरमिश्रवर्यस्य आदर्शैः मार्गदर्शनेन च गुणवत्तायुक्तशिक्षायाः क्षेत्रे संस्थानमिदमग्रणीस्थानं धारयति। प्रतिदिनम् अनेन विश्वविद्यालयेन विकासस्य नावीन्यं स्थाप्यते। एतदर्थं सम्पूर्णः विश्वविद्यालयपरिवारः अभिनन्दनार्हः। अग्रे तेनोच्यते यत् अहं विश्वविद्यालयस्य सर्वान् छात्राछात्रान् प्रति सन्देशं वच्मि यत् ज्ञानं अत्र भवद्भिरर्जितम् ,तस्य उपयोगः स्वदेशे राष्ट्रस्य भारतीयसमाजस्य च सेवाकरणाय करणीयः। अस्माभी राष्ट्रस्य विकासे च अवदानं दातव्यम्।'

## आचार्य-महामण्डलेश्वर-स्वामिकैलाशानन्दगिरिमहाराजः इत्यनेन जम्मू-कश्मीरप्रदेशे संस्कृतगुरुकुलस्य स्थापनार्थं निवेदनं पुरस्कृतम्

वार्ताहरः- डॉ. मूलचन्द्रशुक्लः

जम्मूः। निरञ्जनपीठाधीश्वरेण श्रीश्री १००८ आचार्यमहामण्डलेश्वरेण स्वामीश्रीकैलाशानन्दगिरिमहाराजेन निगदितं यत् महन्तः रोहितः शास्त्री देववाणीसंस्कृतस्य प्रचारार्थं यान् काञ्चन अपि प्रयासान् कुरुते,ते



संस्कृतप्रेमिणामुत्साहं वर्धयिष्यन्ति, भारतीयसंस्कृतिं च सुदृढं करिष्यन्ति।

अस्माकं सांस्कृतिकं वैभवं विश्वशान्तेः संदेशं प्रददाति' इति – शामलालशर्मा।

जम्मूनगरे जम्मू-उत्तरविधानसभा-क्षेत्रस्य विधायकः श्रीमान् शामलालशर्मा श्री कैलख ज्योतिष-वैदिकसंस्थान-ट्रस्ट इत्यस्य अध्यक्षः राज्यपुरस्कृतः महन्तः रोहितः शास्त्री ज्योतिषाचार्यश्च, परमपूज्य-निरञ्जन-पीठाधीश्वरस्य श्रीश्री १००८ आचार्य- महामण्डलेश्वरस्य स्वामीश्रीकैलाशानन्दगिरिमहाराजस्य जम्मू-आगमनकाले शिष्टाचारमेलनपूर्वकं संस्कृतभाषायाः प्रचारप्रसारसंरक्षणादिषु विषयेषु महत्त्वपूर्णां चर्चां कृतवन्तौ। तत्र परिचर्चाक्रमे महन्तेन रोहित- शास्त्रिणा प्रोक्तं यत् संस्कृतम् अखण्डभारतस्य अवधारणायाः भारतीयसभ्यतासंस्कृत्योश्च ऐक्यं प्रतिष्ठापयति। अग्रे तेनोक्तं यत् एषा भाषा अस्माकं प्राचीनज्ञानस्य परम्परायाः साहित्यस्य च आधारभूता अस्ति। संस्कृतस्य संरक्षणसंवर्धनाय च स्वट्रस्ट इत्यस्य प्रतिबद्धता प्रतिपादिता। अस्मिन् प्रसङ्गे महाराजं प्रति जम्मू-कश्मीरप्रदेशे संस्कृतगुरुकुलं स्थापयितुं निवेदनं कृतम्।

परमपूज्यः निरञ्जनपीठाधीश्वरः श्री श्री १००८ आचार्यो महामण्डलेश्वरः स्वामी श्रीकैलाशानन्दगिरि महाराजः अवोचत् यत् श्रीकैलख ज्योतिष-वैदिकसंस्थान-ट्रस्टद्वारा संस्कृतक्षेत्रे क्रियमाणानि कार्याणि प्रशंसापात्राणि वर्तन्ते। अग्रे सः वक्ति यत् एते प्रयासाः संस्कृतप्रेमिणामुत्साहं वर्धयन्ति, भारतीयसंस्कृतिं च सुदृढां करोति। विधायकः माननीयः शामलालशर्मा प्रोक्तवान् यत् ''देववाणीसंस्कृतस्य विकासेन न केवलं भारतं 'विश्वगुरुत्वं प्राप्स्यति, अपितु एषा विश्वशान्तेः समग्रविकासस्य च दिशि मार्गदर्शिकारूपेण अस्ति।अद्यापि संस्कृतं प्रासङ्गिकं वरीवर्ति यतोहि संस्कृतद्वारा समाजः संस्कारयुतः सामाजिकविकाससंयुतश्च भवति। अन्तिमे तेनोक्तं यत् रोहितशास्त्री संस्कृतस्य प्रचारप्रसाराय प्रदेशे महत्त्वपूर्णां भूमिकां निर्वहति।

# सम्भवेज्जीवतो मुक्ति: क्षेत्रे श्रीपुरुषोत्तमे



प्रो. बनमाली बिश्वाल:

चतर्षु पुरुषार्थेषु मोक्षो लोके विशिष्यते।
मोक्षो वै नैकसंज्ञाभि: शास्त्रेषु प्रतिपादित:।।
निर्वाण: कथ्यते मोक्ष: मुक्तिरेषा निगद्यते।
मोक्षस्तु जन्मनोभाव: तापत्रयनिवारणम्।।
निर्वाणपरिभाषा का वर्णयितुं न शक्यते।
अनिर्वाच्योस्ति निर्वाण: को वा वर्णयितुं क्षम:।।
दर्शनेषु च सर्वेषु मोक्षमार्गो निरूपित:।
आस्तिकेषु च सर्वेषु नास्तिकेषु क्वचित्पुन:।।
मोक्षप्राप्तेश्च मार्गास्तु स्वस्वरीत्या प्रदर्शिता:।
सत्स्वपि भिन्नमार्गेषु लक्ष्यमेकं न संशय:।।
सिद्धिर्नि:श्रेयसो धर्मो न्यायशास्त्रे च कथ्यते।
एवं नि:श्रेयसोर्थोत्र मोक्ष एवास्ति मुख्यत:।।
कैवल्यं दर्शनेष्वेव वेदान्ते बौद्धजैनयो:।
दर्शने चौव बौद्धानां निर्वाणस्तु विशिष्यते।।
सर्वासामपि सत्तानामभावस्तत्र मन्यते।।
निर्वाणमधिकृत्यैव काव्यानि लिखितानि वै।
शंकराचार्यपादानां काव्यमत्र विशिष्यते।।
ब्रह्मणि लीयते जीव: निर्वाणस्य स्थितौ पुन:।
शिवोहमिति जीवस्य ज्ञानं भवति सर्वथा।।
देहाद् देहान्तरे प्राप्ति: पुनर्जन्म निगद्यते।
मुक्तिश्च जन्मचक्रात्तु मोक्षश्शास्त्रेषु मन्यते।।
ब्रह्मणि लीयते जीवो ब्रह्माहमस्मि मान्यता।
विलयश्च शरीरस्य मोक्ष: काम्य: शरीरिभि:।।
वाणस्यार्थो भवेद्दु:खं देहो वा मन्यते क्वचित्।
दु:खाभावोस्ति निर्वाण: देहाभाव: क्वचित् पुन:।।
एवं योगवशिष्ठे च विषयश्चास्ति वर्णित:।
लक्ष्यमेकं समेषां च किन्तु मार्गो विशिष्यते।।
गंगाया दर्शनान्मोक्ष: हरिनामजपात्क्वचित्।
मुक्तिश्च मरणात् काश्यां श्रीक्षेत्रे देवदर्शनात्।।
पुर्यां दृष्ट्वा जगन्नाथं पुनर्जन्म न वर्त्तते।।
मुक्तिश्च नीलचक्रस्य छायायामपि वर्त्तते।
जगन्नाथरथस्यापि छायायां मुक्तिरिष्यते।
सम्भवेज्जीवतो मुक्ति: क्षेत्रे श्रीपुरुषोत्तमे।।

# शाकुन्तलमृगरक्षाष्टकम्



-डॉ. विपिनकुमारद्विवेदी

दुष्यन्तनाम नृपति: पुरुवंशरत्नम्,
राज्याद्विरूढरथबाणधनुस्सुसज्ज:।
एकं मृगं घनवनेनुसरन्सवेगम्,
रुद्धस्तपस्विमुनिभिश्च शरप्रपाताद्।।

अत्यन्तकोमलवपुर्हरिणस्सुरम्य:,
वज्रोपमेषुविनिपातविसह्यचित्त:।
धर्मध्वजैककरभूपतिरेव लोके,
सम्पातु न प्रहरतु प्रविभीतजीवम् ।।

शान्ताश्रमे हि विहरन्तरुपुष्पयुक्ते,
शष्पं नवं सुहरितं परितो विखादन्।
उत्प्लुत्य खेलतितरां नयनाभिराम:,
राजन्त्वया मृदुमृगो नहि मारणीय:।।

विश्वस्त एष चरति प्रविभूय हृष्ट:,
जानात्यसौ वयमिहाधिकृता भ्रमाम:।
निश्चिन्तभावसहितो हरिण: प्रसन्न:,
तत्प्रत्ययस्य कुरु न: प्रति हे सुरक्षाम्।।

धर्मैककार्यनिरता मुनयो वयं च,
कुर्मस्सदा तरुलतावनजीवरक्षाम्।
राजन्तपस्विविमलव्रतहोमहेतो,
रागत्य नो भवति सत्यमहो सहाय:।।

रक्ष्या यथा च विपिने वयमत्र राजन्,
मुग्धस्तथा खलु मृग: परिरक्षणीय:।
अस्मत्तपो लसति लोकहिताय सर्वम्,
बाधा हि कापि भवति प्रणिहंसि नूनम्।।

हे हस्तिनापुरविशेषनिवासकारिन्,
श्रान्तो भवान्हि भवदीयरथाश्ववृन्दम्।
सौन्दर्यभूषितवने क्रियतेपि हार्दम्,
सत्स्वागतं नृप फलादिकमत्र भुंक्ष्व।।

पूताम्बु हे नृप पिब प्रवहन्नदीनाम्,
नैजक्लमं हर सुशीतलवायुकम्पै:।
होमाग्निनिस्सृतसुगन्धसुपूर्णभूमौ,
पत्रादिकैर्विरचिते शयने विभाहि।।

# हिन्दूजागराष्टकम्!



-डॉ. अरविन्दकुमारतिवारी

रे रे भारतहिन्दव:! गतदया दग्धत्रपा बन्धव:!
बांग्लादेशकृतं विलोक्य पिहितं वो नेत्रयुग्मं कथम्?
श्रीरामार्जुनचन्द्रगुप्तकुलजा: गेहे भवन्तो मुदा
सेवन्ते सुखविष्टरं किमधुना नो दूयते किं मन:?।। १
कन्यास्त्रीसुतवंशजान् गृहधनं दुष्टा हरन्तोऽसुरा:
निर्दोषान्मनुजान्निहत्य यवना
लुण्ठन्त्यसून् निर्दया:।
किन्त्वेतन्निजभारतीयमधुना मौनं कथं शासनं
श्रीमान् नो कुरुते नरेन्द्र इव हा मोदी सुरक्षां द्रुतम्। २
अस्माकं भुवि रक्षका: क्व मनुजा
मौनं भजन्ते वरा:
शक्ता हिन्दुकुलोद्भवा वयमहो पश्याम एवाहता:।
अन्ताराष्ट्रमहोच्चमञ्चमुखरा देशा इमे मौनिनो
बांग्लादेशजहिन्दुघातनकथां ज्ञात्वाप्यहो शत्रव:।।३
साहाय्यं न करिष्यते कुसमये तेषामये सत्वरं
हिन्दूनां यदि धीमतां तदनु नो राष्ट्रेतिहासे वयम्।
दर्शं दर्शमिमां दशां न रुधिरं तप्तं भवेत् सात्त्विकं
जीवन्तोऽपि मृता भवेम न तदा सर्वे ध्रुवं हिन्दव:।। ४
अस्मास्वेव भवन्ति केचिदनिशं दुष्टात्मनां पक्षगा:
ते सर्वे जयचन्दनाममहिता हिन्दुद्रुहां किङ्करा:।
लब्धुं ये मतमादिनं बहुमुखा: जल्पन्त्यपार्थां कथां
तेषां बुद्धिरिमां विलोक्य कुदशां मौनं श्रिता गह्वरे।। ५
सङ्कल्पोऽस्तु वयं चलेम सहसा साकं सदा हिन्दव:
रक्षार्थं भुवि भारता: प्रतिपलं निर्व्याजमेवोत्थिता:।
अस्माकं न विखण्डनं वरमहो श्रुत्वापि तूष्णीं ध्रूवं
गेहेषु प्रमुदा प्रशान्तमनस: कस्माद् वयं शेमहे।। ६
बांग्लादेशकथास्ति कापि रचना हिन्दोर्विघाते कृता
दृष्ट्वैनां जहतु प्रिया : सहृदया: वीरा: स्वनिद्रामिमाम्।
यद्येवं प्रविलोक्य मौनसदने सर्वे भवन्तस्ततो
नायं शत्रुरमेरिका कथमित: पातुं समायास्यति।। ७
ईर्ष्याद्वेषमदादिमत्तमनुजा हित्वा मिथो योधनं
कुर्याम द्रुतमेव हिन्दुहृदयं स्पृष्ट्वा प्रतीज्ञामये।
राष्ट्रं भारतमेव रक्षतु निजान् हिन्दूनिमानाहतान्
वा हिन्दुस्वरमेव विस्मरतु नो कुर्यात् पुनर्नाटकम्।। ८

# महाकविकालिदासाष्टकम्!

'हे कालिदास! कविवंशरवे! कवीन्दो!
काव्यार्णवोर्मिललित! श्रुतिधर्मसिन्धो!
साधारणोऽस्ति भगवन्! न भवान् जगत्यां
रत्नं यथा सुकविरत्न! कवीन्द्रगोष्ठ्याम्।।१
देवोऽथवा परमतत्त्वकुलस्य दूत:
गन्धर्वयक्षकुलज: प्रकृतिप्रसूत:।
श्रेष्ठो भवान् मुनिवरो जगतां हितैषी
ब्रूते स्वदेशवसुधामनुजो विदेशी।। २
जानासि लोकपरलोकपरम्परां तां
वेत्तीव संस्कृतिरियं निजभारती याम्।
त्वं कर्मवादविपिनस्य वटोऽसि कश्चित्
यक्षाननाद् वदसि रामगिरौ मनोवित्।।३
श्रीमन्! महाकविकुलोत्तम! कालिदास!
राष्ट्रप्रिय! द्रुतगते! श्रुतिसारभाष!
कालेश्वरस्य कृपयाकलयन् न शक्त्या
विश्वं कवित्ववशगं कुरुषे स्वभक्त्या।।४
धृत्वा स्वयं क्वचिदहो मुनिकण्ववेषं
सोमादितीर्थगमनं कुरुषे विशेषम्।
कर्मच्युतां शपसि कोपमुनिश्च भूत्वा
मन्त्रं ददासि करुणालय किन्नु शप्त्वा।।५
शाकुन्तलं तव कृति: कविताविलास!
विश्वश्रुता प्रियतमा कविकालिदास!
माधव्यहास! शिवदास! नवप्रकाशै:
चेतो न कस्य तनुते मधुरावकाशै:। ।६
त्वामेकमेव कवय: सुकविं महान्तं
लोके स्तुवन्ति न तथान्यकविं भ्रमन्तम्।
काव्यं ममापि कविदृष्टिकटाक्षबाणै:
विद्धं प्रसिद्धकविराट् प्रकुरुष्व कम्रै:।।७
प्रातर्मया विरचितं किल रेलयाने
काव्योत्सवाय कविरत्ननुति: प्रजाने।
कालेश्वर: प्रभुरवेत् कविलोकदाता
श्रीकालिदासरचनामुदितो नृपाता।। ८

# ।। काशीश्वरं प्रणौमि।।



पंकज कुमार झा
वैद्यनाथधाम, देवघर:
झारखण्डम्

गङ्गाजलोच्छलछटा प्रविभाति यस्य
धाम्नि प्रवासमधिकजन्मफलार्जितेन ।
सन्दर्शनेन समकल्मषनाशनं वै
काशीश्वरं सकलमोक्षकरं प्रणौमि ।। १ ।।
संसारबिन्दुसुरसिन्धुरिव प्रसूते
आनन्त्यकोटिजगनायकशङ्करन्तम् ।
ब्रह्माण्डभाण्डरचने कुशलं कुलालं
काशीश्वरं सकलकष्टहरं नमामि ।। २ ।।
यज्ञोपवीतविधिना पठनार्थमन्ये
आयान्ति विप्रवटुका: प्रतिवर्षनित्यम् ।
मातान्नपूर्णवरदा प्रददाति भोज्यं
काशीश्वरं सकलपुण्यकरं भजामि ।। ३ ।।
सक्तून् पिब प्रचल वाञ्छसि यत्र काश्यां
काशीन्त्यजेति कुविचारमहो ! प्रणश्ये: ।
विद्यासमस्तसकलाऽखिलराजधानी
काशीश्वरं सकलवेदप्रदं गृणामि ।। ४ ।।
धिग्जन्म तस्य न कदापि सुरम्यकाशीं
गत्वाऽनमन्निखिलपुण्यमयं सुराशिम् ।
या संस्थिताऽप्रतिहता नगरी त्रिशूले
काशीश्वरं सकलतीर्थवरं स्मरामि ।। ५ ।।

# जीवनं जीवति श्यामलं किन्न तद्



डा. महेशनारायणशास्त्री
कुरेड़ा,टोङ्क, राजस्थानम्
मो.नं. ९८२८८७४६०१

जीवने वैभवं प्राप्य मूढो नरो,
नेश्वरे श्रदधातीह धर्मेऽपि नो।
आत्मदर्पान्वितो भूतले वै भ्रमञ्
जीवनं जीवति श्यामलं किन्न तद्।।१।।
दीनहीनं जनं सेवते नो कदा,
दानपुण्येऽपि नैवास्ति पूर्णा रुचि:।
वित्तसम्पादनार्थं सदा चिन्तयञ्
जीवनं जीवति श्यामलं किन्न तद्।।२।।
सेवते नैव सत्यं शिवं सुन्दरं
रूप्यकं हीश्वरं भाति तं केवलम्।
सर्वदा जीवनेऽन्यायमार्गे चलन्
जीवनं जीवति श्यामलं किन्न तद्।।३।।
पूर्वजानां विसृज्य स्वधर्मं हृदा,
मानसे लज्जते मन्दधी र्नो कदा।
केवलं पापकार्ये मनो धारयन् जीवनं
जीवति श्यामलं किन्न तद्।।४।।
स: स्वयं श्रेष्ठतां ख्यापयन्नात्मनस्
तुङ्गमञ्चेऽपि जिह्रेति नो मानसे ।
अर्धकुम्भो यथा घोषमाणस्सदा,
जीवनं जीवति श्यामलं किन्न तद्।।५।।
निर्धनैस्सश्रमं जीविका चालिता,
नैव तस्माद् वृथा ह्यामयो जायते।
वितवान्नामयं सर्वदा संवहन्
जीवनं जीवति श्यामलं किन्न तद्।।६।।
सुश्रमी साहसी मानव: सर्वदा,
सूर्यवद्भासते मानवानां व्रजे।
वित्तवान् हा! विना सुश्रमं भक्षयन्
जीवनं जीवति श्यामलं किन्न तद्।।७।।
द्रव्यलोभाज्जनान्निर्धनान् पीडयन्
बन्धुतां नाशयन् क्रूरतां दर्शयन्।
सर्वथा हा! मुधा पापपङ्के पतन्
जीवनं जीवति श्यामलं किन्न तद्।।८।।



## काशीस्तवनम्



डॉ राहुलपोखरियालः
देवघरः , झारखण्डः।

गन्तारोऽवनिदिक्समृद्धनगरीं काशीं व्रजन्त्यातुराद्
विद्यापारविभाऽऽलयान्नवनवं ज्ञानं विगृह्णन्ति ते।
काले यान्ति मुमुक्षवो भवकुले श्रीविश्वनाथाश्रये
भाग्योत्थानवशाद्विशिष्य रमते काश्यां कलौ मानवः।।

गङ्गायाः सुजलं निपीय सरसं स्नान्ति प्रसादोन्मुखा
मध्ये ते सरितो जपे च निरता रात्रिन्दिवं साधकाः।
नौकाहारविहारमोदवशगा अत्राभया यात्रिणो
भाग्योत्थानवशाद्विशिष्य रमते काश्यां कलौ मानवः।।

वाणीं संस्कृतसज्जितां प्रवदतां विद्वज्जनानां सतां
दाक्ष्यं वीक्ष्य मनः प्रसीदति सदा पुर्यां रमायां मम।
शास्त्रार्थानुपरम्परेह जीवति यथा नैतादृशी कौ क्वचिद्
भाग्योत्थानवशाद्विशिष्य रमते काश्यां कलौ मानवः।।

आदौ सङ्कटमोचनं सुतुलसीदासो ददर्शार्चया
तत्रैवास्ति कलाकृतेर्हनुमतो नेत्रासुखं मन्दिरम्।
दुःखार्त्तानवनौ प्रमोदयति यश्श्रीरामदूतो महान्
भाग्योत्थानवशाद्विशिष्य रमते काश्यां कलौ मानवः।।

दिव्याभाप्रभया चकास्ति करुणाऽकूपारगङ्गाधरः
काशीस्थः कलुषान्तकः कलिनयश्श्रीविश्वनाथस्सदा।
भेदाभेदविचारशून्यसरलो बाबास्ति भक्ताश्रयो
भाग्योत्थानवशाद्विशिष्य रमते काश्यां कलौ मानवः।।

जज्ञे भारतभूविशालहृदयश्श्रीमालवीयोत्र हि
संस्थानं सुकलान्वितं विरचितं षहिन्दूष प्रसिद्धात्मकम्।
नाम्ना सोस्ति महामना न सुतरां संकल्पशक्त्या तथा
भाग्योत्थानवशाद्विशिष्य रमते काश्यां कलौ मानवः।।

यद्यायान्मणिकर्णिकाख्यनिकटे द्रष्टुं यथार्थं फलं
तत्राग्निप्रचये प्रदह्य मनुजः प्राप्नोति मोक्षं त्वरा।
जीवान्ते समये यथेष्टकृपया वासो भवेद्यत्र वा
भाग्योत्थानवशाद्विशिष्य लभते काश्यां कलौ मानवः।।

काशीखण्डदृशा प्रकल्पितकथा पूर्वं श्रुता श्रद्धया
आनन्दाप्तशिवाचलधरा व्यष्ट्या व्यलोक्यद्य सा।
दक्षो वर्णयितुं कविर्निजधिया नैवास्ति सर्वस्थितं
भाग्योत्थानवशाद्विशिष्य लभते काश्यां कलौ मानवः।।

## प्रार्थयेऽहम्



-ईशानतिवारी
काशीहिन्दूविश्वविद्यालयः

रोगपीडां विना युद्धकोपं विना
शोकचिन्तां वियोगं विना वर्धताम् ।
राजतां धर्मभूमिप्रियं पावनं
देवतानन्दगेहं स्वकं भारतम् ।।१।।
रुष्ट-मित्रेण सार्धं पुनः स्थापनं
मित्रतायाः सदा स्याच्छुभं कामये।
शत्रुतानाशनार्थं भजे भारतीं
सद्विवेकं जनेभ्यः प्रदेहि शिवे ।।२।।
इष्ट-पूजां करिष्याम्यहं मन्दिरे
दिव्यपुष्पं च वाञ्छाम्यहं तत्कृते।
एतदर्थं शिवे! प्रार्थये सादरं
स्यात्सुवर्षा जनापेक्षिता भारते ।।३।।
धर्मसेवी कदापीष्टभोगं विना
लोकहानिर्भवेन्नो शिवं प्रार्थये।
काशिकायां यथा भोजनं दीयते
सर्वलोकाय देहीश्वर! त्वं तथा।।४
प्रार्थयेऽहं कविः कृष्णभक्तो भुवि
श्रूयतां वर्धतां दीयतां वाञ्छितम्।
मत्प्रिये भारते मानवाः साधकाः
स्युः प्रसन्नाः सदा कामये सत्वरम् ।।५।।


### पाठकानां कृते सूचना

कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुक्लः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते।

वित्तकोषविवरणम्

**Sanskrit samvad,**

Current A/C No. 224902000000142,
Indian Overseas Bank, Yamuna Vihar,
Delhi-110053
IFC Code- IOBA0002249


# काश्यां वैदिकविज्ञानविषयकं राष्ट्रियसंगोष्ठी

- डॉ. लक्ष्मीकान्तविमलः

नवदिल्लीस्थितं श्रीशंकर-शिक्षायतन-वैदिक-शोध-संस्थानम् एवं वाराणसीस्थं ज्ञानप्रवाह- सास्कृतिकाध्ययनकेन्द्रम्, इति द्वयोः संस्थानयोः संयुक्ततत्त्वावधाने नवम्बरमासस्य १७ तमे दिनांके २०२४, रविवासरे ज्ञानप्रवाहस्य सभागारे 'पण्डित-मधुसूदन-ओझामहोदयस्य व्यक्तित्वं



कर्तृत्वम्' इतिविषयमधिकृत्य दिनव्यापिनी राष्ट्रिया संगोष्ठी सुसंपन्नतां गता । उद्घाटनसत्रस्य अध्यक्षः म. सा. राष्ट्रियवेदविद्याप्रतिष्ठानस्य उपाध्यक्षः प्रो. हृदय-रञ्जन-शर्मा आसीत्। तेन कथितं यत् वैदिकविज्ञाने इतिहासः वैदिकसन्दर्भस्य दृष्ट्या उपस्थापितः अस्ति। काशी-हिन्दू -विश्वविद्यालयस्य संस्कृतविद्या-धर्मविज्ञान-संकायस्य पूर्वसंकायप्रमुखः मुख्यातिथिः प्रो. बालशास्त्री स्वकीये वक्तव्ये निरूपयामसा। यस्मिन् समये भारतीयः विद्वान् समुद्रयात्रां न करोति स्म। तस्मिन् समये पण्डित-मधुसूदन-ओझाजीमहोदयः महाराजेन माधवसिंहेन सह इंग्लैण्डनगरं गतवान्। सः शास्त्रप्रमाणेन विदेशयात्रायाः प्रासंगिकतां साधितवान् । ज. रा. राजस्थान-संस्कृत-विश्वविद्यालयस्य पूर्वकुलपतिः प्रो. युगलकिशोरमिश्रः स्वागतवक्तव्ये कथितवान् यत् पण्डित-मधुसूदन-ओझावर्यस्य अध्ययनं काश्यां सञ्जातम्। यत्र ज्ञानपुरुषः महामनीषी महामहोपाध्यायः शिवकुमारशास्त्री ओझाजीवर्यस्य गुरुः आसीत्। जवाहरलाल नेहरूविश्वविद्यालयस्य संस्कृत-एवं-प्राच्यविद्याध्ययन-संस्थानस्य आचार्यः प्रो. सन्तोषकुमारशुक्लः विषयप्रवर्तने विस्तारेण पण्डित-ओझाजीमहोदयस्य व्यक्तित्वं कर्तृत्वं च निरूपयामास। अस्यां राष्ट्रियसंगोष्ठ्यां द्वयोः शैक्षणिकसत्रयोः २० विद्वांसः शोधपत्राणि प्रस्तुतवन्तः।



सायंकाले ऋषिसम्मानसमारोहस्य समायोजनं सञ्जातम्। समारोहेऽस्मिन् महामहोपाध्यायः आचार्यः वशिष्ठत्रिपाठिवर्यः, प्रख्यातः नैयायिकः पद्मभूषणभूषितः ऋषिसम्मानेन सम्मानितः आ श्रीशंकरशिक्षायतनेन। काशीहिन्दूविश्वविद्यालयस्य संस्कृतविद्या-धर्मविज्ञान-संकायस्य पूर्वसंकायप्रमुखः प्रो. रामचन्द्रपाण्डेयमहोदयः ऋषिसम्मानेन सम्मानितः जातः। श्रीशंकरशिक्षायतनम् अङ्गवस्त्रेण, सुफलेन, अभिनन्दनपत्रेण, प्रमाणपत्रेण च द्वयोः विदुषोः यथोचितं सम्मान अकरोत्।

अस्मिन् कार्यकार्यक्रमे वाराणसीस्थस्य महाविद्यालयतः विश्वविद्यालयतः अनेके शोधच्छात्राः महनीयाः आचार्याः एवं श्रीलालबहादुरशास्त्रि-राष्ट्रिय-संस्कृतविश्वविद्यालय-वैदिकविद्वांसौ उत्साहपूर्वकं भागग्रहणं विधाय कार्यक्रमं सफलीचक्रुः।

प्रथमपुटस्य शेषभागः

## उत्तरप्रदेशस्य पर्यटनविभागपरतया...

संस्कृतिमंत्रालयः च समुपस्थिताः आसन् स उत्तर प्रदेश पर्यटन द्वारा आयोजितस्य महाकुंभस्य २०२५ प्रस्तावक कार्यक्रमायोजनस्य प्रमुखं उद्देश्यं संगम नगरी प्रयागराजस्य तत्रत्य तीर्थ स्थलानां प्रस्तुतीकरणं च आसीत् स एतत् विशिष्टम् आयोजनम् आध्यात्मिकता- संस्कृति - परंपराणां महायात्रायाः आरंभः अस्ति यत् २०२५ तमे वर्षे विश्वस्य महतां महतां च आध्यात्मिक समागमानां रूपेण समक्षम् आगमिष्यति। अनेक संबद्ध मूल्यानि वैश्विक मञ्चं प्रापयितुम् अयङ्कार्यक्रमः अनुष्ठितः। कलाकाराणां द्वारा सांस्कृतिक कार्यक्रम प्रस्तुतीकरणेन सह लघु चलच्चित्रद्वारा महाकुंभस्य एकं क्षणिकदर्शनमपि प्रस्तुतम् स अस्मिन् अवसरे विभिन्न देशेभ्यः आगण प्रतिनिधयोऽपि सम्मानिताः।



श्रीस्वामिगोविन्ददेवगिरिवेदसंस्कृतमहाविद्यालयगीतम्, वटपत्तनम्,गुजरातराज्यम्।

## राराजते ह्यध्ययनस्थलीयम्।



श्रीमननः हेमेन्द्रकुमारः पण्ड्या
साहित्याध्यापकः
श्रीस्वामिगोविन्ददेवगिरिवेदसंस्कृतमहाविद्यालयः

श्रीस्वामियुक्तस्य यशस्विनो नो
गोविन्ददेवाख्यगुरोः प्रसादात्।
यज्ञोत्थधूमैर्द्विजमन्त्रघोषै
राराजते ह्यध्ययनस्थलीयम्।।
पित्रोः प्रसादात् खलु रामरत्न-
प्रायासराशेर्हनुमत्प्रसादात्।
पुण्यैरुमायाश्शिवतां गताहो
राराजते ह्यध्ययनस्थलीयम्।।
नानाविधापाटलपुष्पगुच्छै
रुद्यानमध्ये शशकाननैश्च।
सूर्यादिमुख्यैर्ग्रहदैवतैश्च
राराजते ह्यध्ययनस्थलीयम्।।
घोषैश्च गानैर्यजुषश्च साम्नः
केकाकलैः कोकिलकाकलीभिः।
देदीप्यमानेह च यज्ञशालाघ्
राराजते ह्यध्ययनस्थलीयम्।।
शम्भोर्हरेश्चाजितदेवतानां
राकेशराकेशमहोदयानाम्।
श्वेताख्यया चन्द्रिकया विशुद्धा
राराजते ह्यध्ययनस्थलीयम्।।
वेदेषु विज्ञानमहो विशोध्य
मोदान्विता यत्र तु शास्त्रिवर्याः।
सङ्गीतसाहित्यकलादियुक्ता
राराजते ह्यध्ययनस्थलीयम्।।
वाग्देवगोदुग्धसुपुष्टवत्सा
जाज्वल्यमानेह च पाठशाला।
दीक्षान्विता दीक्षितशिक्षकैश्च
राराजते ह्यध्ययनस्थलीयम् ।।

शशिनः सुकलाभिरियं सकला
सकला शिवहास्यसिता मुदिता।
श्रवणैर्मननैस्स्मरणैस्सफला
सुफला च सदा भुवि दीप्तिमती।।

**अन्वयः**

अस्माकं यशस्विनः श्रीस्वामियुक्तस्यगोविन्ददेवाख्यगुरोः प्रसादात्, यज्ञोत्थधूमैर्द्विजमन्त्रघोषैः (च) इयमध्ययनस्थली हि राराजते।।
पितृप्रसादात् च रामरत्नस्य( रामरतनजी )प्रायासराशेः च हनुमत्प्रसादात् चउमायाः (उमादेवी काबरा) पुण्यैरहो शिवतां गतेयमध्ययनस्थली हि राराजते।।
उद्यानमध्ये नानाविधापाटलपुष्पगुच्छैः, शशकाननैश्च सूर्यादिमुख्यैर्ग्रहदैवतैश्च इयमध्ययनस्थली हि राराजते।।
इह यजुषो घोषैश्च साम्नो गानैश्च केकाकलैः कोकिलकाकलीभिः देदीप्यमाना च यज्ञशाला (अस्ति तादृशी) इयमध्ययनस्थली हि राराजते।।
शम्भोर्हरेश्चाजितदेवतानां च राकेशराकेशमहोदयानां च श्वेताख्यया चन्द्रिकया विशुद्धा इयमध्ययनस्थली हि राराजते।।
अहो यत्र शास्त्रिवर्यास्तु वेदेषु विज्ञानं विशोध्य मोदान्विता च सङ्गीतसाहित्यकलादियुक्ताः (तादृशी) इयमध्ययनस्थली हि राराजते।
इह वाग्देवगोदुग्धसुपुष्टवत्सा च जाज्वल्यमाना च पाठशाला (या) दीक्षितशिक्षकैः दीक्षान्विता च,(तादृशी) इयमध्ययनस्थली हि राराजते।
इयं सकला शशिनः सुकलाभिः सकला च शिवहास्यसिता मुदिता, सदा च भुवि श्रवणैर्मननैस्स्मरणैस्सफला सुफला दीप्तिमती ।

# श्रीकैलख-संस्कृतरत्न-पुरस्कारः 2024,आचार्य-महामण्डलेश्वर-स्वामि-कैलाशानन्द-गिरि-महाराजाय प्रदत्तः

## (उपराज्यपालवर्येण संस्कृतस्य संवर्धनाय भारतस्य महत्सभ्यतायाः आदर्शानां च प्रचाराय तस्य अप्रतिममवदानं प्रशंसितम्)

वार्ताप्रेषकः-महन्तः रोहित शास्त्री

जम्मूः-वाग्देव्याः समर्चनपुरस्सरं कार्यक्रमस्य प्रारम्भः जातः। तत्र सर्वैरपि अतिथिभिः सह सादरं



महामहिम-उपराज्यपालवर्याणामभिनन्दनं विहितम्। महामहिम-उपराज्यपालः श्रीमनोज सिन्हा महोदयः श्रीकैलख-ज्योतिष-वैदिक- संस्थान-ट्रस्ट द्वारा आयोजिते समारोहे परमपूज्याय निरञ्जन- पीठाधीश्वराय श्री श्री १००८ आचार्य-महामण्डलेश्वराय संस्कृतगौरवाय स्वामिने कैलाशानन्दगिरि जी महाराजाय कैलखसंस्कृतरत्नपुरस्कारं समर्पितवान्। तत्र स्वभाषणे उपराज्यपालवर्यः स्वामी कैलाशानन्द गिरि जी महाराजं प्रबुद्धः सन्तः, योगगुरुः, विख्यातश्च विद्वान् इत्यादिकं विवर्ण्य संस्कृतस्य प्रचाराय भारतस्य महत्- सभ्यतायाः आदर्शानां च प्रचाराय तस्य अद्वितीयमवदानं वरीवर्ति इति प्रशंसितवान्।

उपराज्यपालवर्येण उक्तं यत् "भारतस्य मूल्यम्,सर्वसमावेशीसंस्कृतिः, कलात्मकपरम्परा, 'वसुधैव कुटुम्बकम्' इत्यादि- भावनासंवर्धनादिकञ्च अस्माकं प्राथम्यमस्ति।भारतं भाविजनानां च कृते शाश्वतम् ,शान्तिपूर्णं, प्रगतिशीलं च जगत् रूपयिष्यति। तेन प्रोक्तं यत् भारतं २०४७ वर्षं यावद् विकसितं राष्ट्रं भविष्यति। स्वसम्बोधने राज्यपालवर्येण अस्मिन् समारोहे निगदितं यत् सर्वविधप्रयत्नकर्तृषु वैज्ञानिकाः आध्यात्मिकाश्च जनाः विकासप्रक्रियायाः नावीन्यं प्रोत्साहयितुमग्रे आगच्छन्तु इति।

समारोहे उपराज्यपाल महोदयः महन्तस्य रोहितशास्त्रिणः श्रीकैलखज्योतिषवैदिकसंस्थानद्वारा संस्कृतभाषायाः प्रसाराय प्रचाराय च कृतसर्वविधमवदानं च प्रशंसयति। अनेन संस्थानेन 'मोबाइल संस्कृत गुरुकुलम्,' 'सरलसंस्कृतबोधः' इति प्रकाशनम्,'कर्तव्यपथ' पत्रिका च इत्यादिकानि संस्कृतप्रचारकार्याणि सम्पादितानि। कार्यक्रमस्यान्ते रोहित शास्त्री अतिथिभिस्सह समेषां कार्तज्ञ्यं विनिवेदयति।

तत्र समारोहे मान.विधायकः श्यामलाल शर्मा, कुलपतिः प्रोफेसर बीएन त्रिपाठी, श्रीकैलखज्योतिष-वैदिकसंस्थान ट्रस्ट इत्यस्य अध्यक्षः महन्तः रोहित शास्त्री, वरिष्ठाधिकारिणः,आध्यात्मिकगुरवः,धार्मिकसंगठनप्रमुखाः,नागरिकाः,गणमान्याः जनाः छात्राश्च समुपस्थिता आसन्।







अस्माकं प्रेरणास्रोतः- स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः-डॉ.बलदेवानन्दसागरः, प्रो. वाचस्पति मिश्रः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी,
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलम् - डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।